CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाट्यलतिका

सम्पादकः
श्रीकृष्ण सेमवालः
सचिवः

दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्र दिल्ली सर्वकारः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हिन्दी संस्कृत अकादमी, दिल्ली सरकार द्वारा
पुरस्कार स्वरूप भेंट

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाट्यलतिका

सम्पादकः

श्रीकृष्ण सेमवालः

सचिवः

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
794

दिल्ली संस्कृत अकादमी

Funding by IKS-MoE

(राष्ट्रिय राजधानी क्षेत्र दिल्ली सर्वकारः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशकः
सचिवः
दिल्ली संस्कृत अकादमी,
राष्ट्रिय राजधानी क्षेत्रम् , दिल्ली सर्वकारः

© दिल्ली संस्कृत अकादमी

प्राप्तिस्थानम् –
प्रकाशन विभागः
दिल्ली संस्कृत अकादमी,
राष्ट्रिय राजधानी क्षेत्रम् , दिल्ली सर्वकारः
भूखण्ड सं॰ ५, झण्डेवालानम् , करोलबागोपनगरम् , नव दिल्ली–११०००५
दूरभाषः–२३६३५५९२

मूल्यम्– ५०/– रूप्यकाणि

मुद्रकः
अरुण एन्टरप्राइजेजः
ए–१७, बुनकर कॉलोनी,
अशोक विहारः फेज–४,
दिल्ली–११००५२
दूरभाषः–९८१०१२५७५२, २७४२५८१२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पादकीयम्

अयि देववाणीसमुपासनैकव्रतास्तत्र भवन्तो भवत्यश्च जानन्त्येव यत् संस्कृतनाटकानां वैशिष्ट्यं सर्वासां भाषाणां साहित्यकाराः स्वीकुर्वन्ति, यतः संस्कृतभाषायां नाट्यरचनायाः मार्गदर्शनाय नाट्यशास्त्रसदृशाः लक्षणग्रन्थाः सन्ति। एतादृशाः ग्रन्थाः अन्यासु भाषासु नैव मिलन्ति। अत एव संस्कृते नाट्य-विधाया उत्कृष्टग्रन्थानां प्राचुर्यं विद्यते। संस्कृतस्य लघून्यपि नाट्यानि प्रभावोत्पादकानि भवन्ति। इत्थं नाटकानां लोकोपयोगित्वं विचार्यैव दिल्ली संस्कृत अक़ादमी प्रतिवर्षं विदुषां विदुषीनाञ्च कृते संस्कृतलघुनाटकप्रतियोगितामायोजयति। वर्षेऽस्मिन्नपि भारतस्य विभिन्नेभ्यः प्रान्तेभ्यः संस्कृत-लेखकाः लेखिकाश्च लघुनाटकप्रतियोगितायां सम्मिलिता अभवन् । मूल्याङ्कनानन्तरं प्राप्तपुरस्कारानुक्रमे लब्धाङ्कानुसारं त्रयोदश संस्कृतलघुनाटकानि संयोज्य संस्कृतनाट्यलतिकेति पुस्तकं प्रकाश्य भवतां भवतीनाञ्च करकमलेषु समर्पयन्नतितरां प्रसन्नतामनुभवामि। अकादम्याः अध्यक्षाणां माननीयानां मुख्यमन्त्रिवर्याणां श्रीमतीनां शीलादीक्षित महोदयानाम् उपाध्यक्षाणां श्रीमतां कुलानन्द भारतीय महोदयानाञ्च कृपाभिः भाषा-कला-संस्कृति-विभागस्य सचिवानाम् श्रीमतीनां गीतासागर महोदयानामतिरिक्तसचिवानां श्रीमतां विमल चन्द पाण्डेय महोदयानाञ्च स्नेहेन कार्यमिदं सम्पन्नतां गतम् , तान्प्रत्यहं हार्दिकीं कृतज्ञतां ज्ञापयामि । सम्पादनादिकार्येषु सहयोगायाकादम्याः अधिक़ारिणः कर्मचारिणश्च मुद्रणकार्याय 'अरुणं इन्टरप्राइजेज' इति मुद्रकञ्च प्रत्यहं भूरिशः कार्तज्ञ्यं ज्ञापयामि। नाट्यग्रन्थोऽयं संस्कृतिरक्षायै लोकं रञ्जयेत् इतीयं मे कामना ।

विदुषाञ्चरणञ्चरीकः

श्रीकृष्ण सेमवालः

सचिवः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुक्रमणिका

			पृष्ठः
१	सम्पादकीयम्		
२	सर्वो जीवो भवति समानः	डॉ॰ दे. खं. खरवंडीकरः	१
३	शिवराजस्य गुणग्राहकता	डॉ॰ केशवराम शर्मा	६
४	प्रेरकम्	आचार्य मदन मोहन जोशी	११
५	वयं भारतीयाः	श्री सन्तोष कुमार गुप्ता	१८
६	मूर्खताऽनर्थकारिणी	आचार्य बाबूराम अवस्थी	२३
७	कण्वस्य दुहितृवियोगः	श्री ओम् प्रकाश ठाकुरः	२८
८	सुमुहूर्ते सावधानम्	डॉ॰ वेणीमाधव शास्त्री भा. जोशी	३२
९	विजिगीषोर्विवशता	डॉ॰ कैलाशनाथ द्विवेदी	४०
१०	गुरुदक्षिणम्	डॉ॰ रामकिशोर मिश्रः	५१
११	प्रतिज्ञानम्	डॉ॰ अशोक कुमारः डबरालः	५७
१२	मध्यमाम्बा	श्री राकेश कुमारः	६७
१३	स्वयंवरम्	डॉ॰ कृष्णनारायण पाण्डेयः	७१
१४	काशिराजवधम्	डॉ॰ सुदर्शन कुमार शर्मा	८२

Funding by IKS-MoE

सर्वो जीवो भवति समानः
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
न कोऽपि हीनः, न कोऽपि दीनः,

-डॉ॰ दे॰ खं॰ खरवंडीकरः

(जगद्गुरु-श्रीमदाद्यशङ्कराचार्य-पूज्यपादैः 'मनीषापञ्चकं नाम' विचारपरिप्लुतं सारगर्भं स्तोत्रं व्यरचि । तत्पृष्ठगतं प्रसङ्गविशेषं विषयीकृत्य विरचितं लघुनाटकम् ।)-

पात्राणि

१. अन्त्यजवेषधरो भगवाञ्छिवः, एकाङ्किकाया अन्ते स स्वीयं सत्यस्वरूपं प्रकटयति।

२. ज.गु. श्रीशङ्कराचार्यः (यतिवेषधरः)

३. आचार्याणां शिष्यवृन्दम् (तत्र द्वौ प्रमुखौ, प्रथमः शिष्यः, द्वितीयः शिष्यः इति निर्दिष्टौ।)

मङ्गलाचरणम् (समूहस्वरेण गेयम्)

एकं सन्तं जगति बहुधा संविभक्तं यमाहुः
ख्यातः सर्गस्थितिलयकरो यः क्षितिं त्रायतेऽपि ।
पुष्टिं तुष्टिं प्रणतमनसां यस्य दृष्टिः करोति
गौरीकान्तः, सकलमशिवं हन्तु सोऽयं गिरीशः॥

(मध्याह्नसमयः। वाराणसीक्षेत्रम् । श्रीमत्परमहंस-परिव्राजकाचार्यो जगद्गुरुः श्रीशङ्कराचार्यः सशिष्यपरिवारं स्नानादिकम् आह्निकं कर्म निर्वर्त्य गङ्गाया मणिकर्णिकावतारात् प्रतिनिवर्तते। सर्वेऽपि 'भज गोविन्दं, भज गोविन्दं मूढमते' इत्यादिकं स्तोत्रं पठन्तः काशीविश्वेश्वरदर्शनार्थं गन्तुकामाः।)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(नेपथ्ये)

('जयतु जयतु भगवान् परिव्राजकाचार्यः पूज्यपादः जगद्गुरुः शङ्कराचार्यः'।)- इति शिष्याणाम् उच्चैर्जयघोषः त्रिचतुर्वारम् (मध्ये मार्गं करधृतघटो, घण्टानादं कुर्वाणः कश्चन अन्त्यजो मार्गमेव निरुन्धन् उपविष्टः।) (नेपथ्ये पुनरपि जयघोषः, सर्वे शनैः शनैः रङ्गमञ्चं प्रति उपसर्पन्ति। अग्रतः शिष्याः भवन्ति।)

प्रथमः शिष्यः - अये कोऽपि अन्त्यजो मध्ये मार्गं निषण्णो दृश्यते। धाष्टर्यम् अस्य । तपदसारयामि एनम् । भो भो चाण्डालापसद, अपसर अपसर शीघ्रम् । न त्वं जानासि अस्माकं आचार्यवरो जगद्गुरुः शङ्कराचार्यः इदानीम् इत एव आगच्छति इति। (अन्त्यजः तूष्णीमेव स्थितः)

द्वितीयः शिष्यः - अरे रे श्वपच, किं त्वं बधिरोऽसि। न श्रुतं त्वया यद् अस्माकम् आचार्यवरः इत एव आगच्छति इति। यदि न अपसरसि, अश्मखण्डैः त्वां ताडयिष्यामि। (तथापि अन्त्यजः तूष्णीमेव तिष्ठति। ततः प्रविशति श्रीशङ्कराचार्यः।)

श्रीशङ्कराचार्यः - अयि भो शिष्याः किंनिमित्तोऽयं कोलाहलः? कं प्रति एष संरम्भः, कं प्रति एष कोपः?अलम् अलं कोपेन। न खलु न खलु सर्वजनसाधारणः क्रोधः आश्रयणीयः।

प्रथमः शिष्यः - भगवन् , क्षमाप्रार्थी अयं जनः। किन्तु एष कोऽपि चाण्डालः अस्माकं मार्गं निरुन्धानो वारं वारं निष्कासितोऽपि न दूरम् अप-सरति। कथम् अस्माभिः अग्रे गन्तव्यम्? तेन ईषत् कुपिताः वयम्।

श्रीशङ्कराचार्यः - हन्त, कोऽयं चाण्डालः। मार्गमेव निरुध्य किमिति अत्र स्थितः स्यात् ? वर्तते मे कौतूहलम् । तत् पृच्छामि एनम्। (अन्त्यजं प्रति) अरे, कस्त्वम् ? कुत आयातोऽसि? किं ते मनसि विद्यते ? अपेहि, अपेहि दूरम् । गन्तव्यम् अस्माभिः विश्वेश्वरदर्शनाय ।

(एवं सत्यपि चाण्डालो नापसरति।)

Funding by IKS-MoE

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयः शिष्यः – भगवन् , नायं मृदुना उपायेन दूरं गच्छेत् । तेन लोष्टप्रहारः एव अस्य चरमोपायः।

श्रीशङ्कराचार्यः – मा मा एवं कुरु। सर्वजीवानुकम्पी खलु यतिधर्मः। इमम् एव प्रक्ष्यामः पुनरपि। (पुनरपि अग्रे सृत्वा) बन्धो, किमिति मौनं पालयसि। वयं तावत् स्नानादिकं कर्म अनुष्ठाय भगवतः काशीविश्वेश्वरस्य दर्शनाय प्रस्थिताः। तस्मादपसर दूरं येन तव स्पर्शो न भवति ।

अन्त्यजः – (उच्चैः) इदमेव, इदमेव तावद् नाहमवगच्छामि। किमिति मे स्पर्शः परिह्रियते, परिहीयते च? किं नाहं मनुष्यः? यथा युष्माकं हस्तपादाद्यवयवाः, तथैव मे। यथा युष्माकं मुखे वाणी सृष्टा तथैव मे। यथा युष्माकं तथैव मे मनः आत्मा वा। तेन को विशेषः? उच्यताम् , उच्यताम्। परिगृहीतेऽपि यतिवेषे भवादृशानां केवलं बहिरङ्गे परिवर्तनं न पुनरन्तरङ्गे ।

श्रीशङ्काराचार्यः – (अपवार्य) अहो चित्रम् । अन्त्यजोऽपि नाम देववाणीम् आश्रित्य ब्रवीति। (अन्त्यजं प्रति) अरे, अहं खलु कृतस्नानादिक्रियाकलापः भगवतः पार्वतीपतेः दर्शनार्थं गच्छामि। तस्मात् सत्वरम् अपसर दूरम् ।

अन्त्यजः – भगवन् , न शोभते इदं वचनं भवादृशानां कृते। कुतः? सर्वेषां हृदयेषु ईश्वरस्य निवासः। स्वयं भगवता श्रीकृष्णेन उक्तम्–

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति। अपि च सर्वजनसाधारणं भवति चित्–तत्त्वम् । तत् कथं भ्रान्तोऽस्ति भवान् । भूयोऽपि श्रूयतां गीतावचनम्–

'विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।' इति

अरे रे वृथा भवतः शास्त्राध्ययनम् । 'विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयं विभेदभ्रमः।'

श्रीशङ्कराचार्यः – क्षन्तव्यं क्षन्तव्यम् । वेदवेदान्तपारगो दृश्यते भवान्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अधिकं विस्तरेण श्रोतुकामोऽस्मि भवत्सकाशात् ।

अन्त्यजः – किमिति मां लज्जयति भवान् । क्व भवादृशाः परिव्राजकानां धुरि कीर्तनीयाः महात्मानः क्व चाहम् अल्पमतिर्वराकः । तथापि भवद्वचनात् प्रयतिष्ये। 'गच्छ दूरम्' इति मां प्रति वदतो भवतः कोऽभिप्रायः? यदि शरीरं प्रति इदं वचनं तर्हि सर्वाणि शरीराणि अन्नमयानि। तत्र को भेदः? अथ शरीरिणम् , आत्मानम् उद्दिश्य तर्हि मिथ्या गृहीतोऽस्ति भवान् । सर्वेषां प्राणिनां सच्चिदानन्दरूपम् आत्मतत्त्वं समानम् । कथं नाम तत्र भेदः कर्तुं शक्यः। सूर्यस्य बिम्बं यथा गङ्गाप्रवाहे तथैव चाण्डालवाटीं परितः पयः पूरे संक्रान्तं दृश्यते। किं द्वयोरन्तरम् ?

श्रीशङ्कराचार्यः – भगवन् , प्रसीद प्रसीद। सत्यमहं भ्रान्तः आसम् । मोघं मे परिव्राजकत्वम् । केवलं काषायं वसनं परिहितम् । तन्मर्षयतु मां भवान् कृतापराधम् । (इति अन्त्यजपादयोः पतितुं पुरो धावति।)

शिष्याः – (उच्चैः)– आचार्य, आचार्य, मा मा एवं क्रियताम् । अयम् अन्त्यजो, भवान् च परिव्राजकश्रेष्ठः। तेन अनुचितोऽयं प्रणामव्यवहारः।

श्रीशङ्कराचार्यः – अलम् , अलं वारयित्वा। नूनं 'चाण्डालोऽपि द्विजश्रेष्ठः परमार्थपरायणः' इति स्मृतं स्मृतिवचनं मया। उन्मीलितम् अनेन मे नेत्रयुगलं ज्ञानाञ्जनशलाकया। येन एतादृशं दिव्यं ज्ञानं प्राप्तं स खलु चाण्डालोऽस्तु, द्विजोऽपि वास्तु स मे गुरुरेव वन्दनीयः। (अन्त्यजं प्रति) महात्मन् , सम्यक् प्रतिबोधितोऽस्मि। प्रनष्टो मे मोहः। भवत्प्रसादात् स्थितोऽस्मि गतसंदेहः इदानीम् ।(श्रीशङ्कराचार्यः सशिष्यपरिवारं प्रणमति ।) (रङ्गमञ्चे अन्धकारः, अन्त्यजो निष्क्रान्तः, तत्स्थाने भगवान् शिवः प्रकटीभवति, शनैः शनैः प्रकाशो रङ्गमञ्चे आविर्भवति ।) – (सर्वेऽपि स्तिमिताः सन्ति।)

शिवः – उत्तिष्ठत, उत्तिष्ठत। शङ्कराचार्यः उत्तीर्णोऽसि परीक्षाम् । सदैव समत्वभावो वर्तेत ते मनति सकलं प्राणिजातं प्रति ।

Funding by IKS-MoE

श्रीशङ्कराचार्यः – अहो आश्चर्यम् । कथं भगवान् शिव एव स्वयं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकटीभूतः। धन्याः स्मः, अनुगृहीताः स्मः वयम् । भगवन् , सत्यं मयावगतम् । मानवता एव धर्मः। न कोऽपि हीनः, न कोऽपि दीनः, सर्वो जीवो भवति समानः।

शिवः – आचार्य, उच्यतां किं ते भूयः प्रियमुपकरोमि ।

श्रीशङ्कराचार्यः – अहो आश्चर्यम् । कथं भगवान् शिव एव स्वयं प्रकटीभूतः। धन्याः स्मः, अनुगृहीताः स्म वयम् । भगवान् , सत्यं मयावगतम् । मानवता एव धर्मः। न कोऽपि हीनः, न कोऽपि दीनः, सर्वो जीवो भवति समानः।

शिवः – आचार्य, उच्यतां किं ते भूयः प्रियमुपकरोमि।

श्रीशङ्कराचार्यः – भगवन् , विदितवेदितव्योऽस्मि। नास्ति अतः परं किमपि प्रियम् । तथाहि–

प्रनष्टो मे मोहस्तिमिरपटलं लुप्तमखिलम्
'इदं सर्वं ब्रह्मे' त्ययमपि च बोधः समजनि।
प्रसादस्ते लब्धो, हृदि समुदितो ज्ञानसविता
समुत्खातं द्वैतं, न खलु किमपि प्राप्यमधुना ॥

तथापि इदमस्तु – **अद्वैततत्त्वमार्तण्डश्चकास्तु जगतीतले ।**
जना भद्राणि पश्यन्तु समतां शान्तिमाश्रिताः॥

(निष्क्रान्ताः सर्वे।)

(समाप्तमिदं लघुनाटकम् ।)

✦ नरहरिनगरसमीपे गुलमोहरपथः
अहमदनगरम्–४१४००३,
महाराष्ट्रराज्यम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिवराजस्य गुणग्राहकता

–आचार्यो डॉ॰ केशवरामः शर्मा

पात्रपरिचयः

१. **क्षत्रपतिर्महाराजः शिवराजः**[१] – महाराष्ट्राधीशः

२. **तानाजिः** – शिवराजस्य सेनाध्यक्षः

३. **मालोजिः** – एको द्वादशवर्षदेशीयः किशोरः

४. **शम्भुकुमारः**[२] – शिवराजस्य पुत्रः

५. **रघुवीरसिंहः** – मण्डलेश्वरः

अथ प्रथमं दृश्यम्

[क्षत्रपतिर्महाराजः शिवराजः स्वशयनकक्ष एकस्यां सुसज्जितशय्यायां सुखेन शेते। शनैः–शनैरेको बालको निभृत–रूपेण महाराजस्य समीपमागच्छति। यावत्स स्वखड्गमपकोशं कृत्वा महाराजं हन्तुमिच्छति तावत् 'तानाजिः' स्वदक्षिणहस्तेन तस्य करं गृह्णाति वामहस्तेन च तत्खड्गमपनयति ।]

तानाजिः– [सक्रोधमुच्चस्वरेण] रे मन्दबुद्धे ! दुरात्मन् ! त्वं निर्घृणः कोऽसि ? यो महाराष्ट्रोद्धारकमेवं छलेन हन्तुमिच्छसि ।

---

१. 'शिवाजी'ति ख्यातो महाराजः।

२. 'शम्भाजी'ति ख्यातो राजकुमारः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
बालकः– ममाभिधानं 'मालोजि' इत्यस्ति। अहं निस्सन्देहं महाराजस्य वधार्थमेवात्रागतोऽस्मि ।

शिवराजः– [तयोः सम्भाषणेन निद्राभङ्गेनोत्थितो महाराजः] रे निर्भीकबालक ! मया तव किमपराद्धम् ? त्वं किमर्थं मम वधमिच्छसि ?

मालोजिः– भवता मम किमप्यनिष्टं न कृतम् , किन्तु मम जननी रुग्णा बुभुक्षिता चास्ति ।

शिवराजः– किं तस्या विपदोऽहं कारणभूतमस्मि ?

मालोजिः– न खलु, किन्तु भवतो वधादहं पञ्चसहस्र-रूप्यकाणि प्राप्तुं समर्थोऽस्मि ।

तानाजिः– दुष्ट ! किं कथयसि त्वम् ? अहं त्वामिदानीमेव लक्षधनिनङ्करोमि । त्वं मरणायोद्यतो भव ।

मालोजिः– [महाराजं प्रति] श्रीमन् ! अहं मृत्योर्न बिभेमि तथापि मम कथनं मिथ्या नास्ति ।

शिवराजः– कुतो ग्रहीष्यसि त्वं पञ्चसहस्ररूप्यकाणि ?

तानाजिः– हे दीनबन्धो ! भवतः शत्रुणा 'सुभागरायेण' अहं भवतो वधार्थं प्रेरितोऽस्मि। निर्धनोऽहं यदा ऋणरूपेण तस्य सकाशाद्धनं याचितवान् तदा तेनोक्तं यद्यहं येनकेन प्रकारेण महाराजस्य वधे समर्थो भवामि तदा स मह्यं पञ्चसहस्ररूप्यकाणि दास्यति । तेनैव मह्यमयं गुप्तमार्गोऽपि दर्शितः ।

मालोजिः– यतो हि ममापराधोऽमर्षणीयोऽस्ति। अतोऽहं मृत्युदण्डान्न बिभेमि किन्तु ममैका प्रार्थनाऽस्ति ।

तानाजिः– महाराज ! अयं कथमपि कृपापात्रं नास्ति। मम हस्तोऽस्य वधाय पुनः पुनः स्फुरति ।

शिवराजः– वयस्य ! अहं तव वीरतां कार्यकुशलतां मां प्रति प्रगाढस्नेहञ्च जानामि तथाप्यस्य प्रार्थनां श्रोतुमिच्छामि ।

मालोजिः– हे कृपालो ! मम माता बुभुक्षिता रुग्णा मरणासन्ना चास्ति।
Funding by IKS-MoE
अहं । अहं तस्या दर्शनमिच्छामि । तां प्रणम्य सर्वं वृत्तान्तं निवेद्य चाऽहं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मृत्युदण्डग्रहणाय यथाशीघ्रमागमिष्यामि ।

तानाजिः- दुष्ट ! त्वमत्रैव यमराजं स्वप्रणामं निवेदय। किं पुनरपि शठतां कर्तुमिच्छसि? इयमस्ति तव पलायनस्य योजना ।

मालोजिः- हे सेनाध्यक्ष ! अहं महाराष्ट्रियोऽस्मि। महाराष्ट्रियः कदापि मिथ्यावादी न भवति। महाराजस्य वधार्थे मम मूढता विवशता वाऽऽसीत् । अहं सत्यात्कदापि पराङ्मुखो नाऽस्मि ।

शिवराजः- यद्येवं तदा स्वैरं गच्छ। श्वः त्वयाऽश्यमेवाऽऽगन्तव्यम् ।

मालोजिः- [महाराजं साष्टाङ्गं प्रणम्य] अहमनुगृहीतोऽस्मि। [गच्छति]

[पटाक्षेपः]

इति प्रथमं दृश्यम् ।

अथ द्वितीयं दृश्यम्

[महाराजः शिवराजः स्वराज्यसभायां विचारमग्नस्तिष्ठति। तानाजिः शम्भुकुमारो रघुवीरसिंहश्च सर्वे यथास्थानं विराजन्ते।]

शम्भुकुमारः-तस्य किशोरस्य दुस्साहसो घृष्टता राजद्रोहश्चाऽक्षम्या अपराधाः सन्ति । तं प्रति कृपा सर्पाय दुग्धमिवाऽसह्याऽस्ति ।

शिवराजः- किमस्त्येष तव मम न्यायेऽविश्वासः?

शम्भुकुमारः- [पितुश्चरणौ संस्पृश्य] क्षम्यतां श्रीमन् ! क्रोधावेशेनाऽहं विवेकशून्योऽस्मि। पुनश्च । कीदृशीयमस्माकं सुरक्षाव्यवस्था? यस्यां महाराजस्य शयनकक्षोऽपि सुरक्षितो नास्ति ।

रघुवीरसिंहः-अहमप्यस्मिन्विषये चिन्तातुरोऽस्मि। अद्यैव सुदृढा व्यवस्था भविष्यति। धन्योऽस्माकं सेनापतिर्येन महाराष्ट्रगौरवं रक्षितम् ।

शिवराजः- यद्यपि भगवत्याः कृपा, गुरुदेवस्याऽऽशीर्वादाश्च मां सदैव रक्षन्ति तथापि मम सुहृद्तानाजिः अवश्यमेव पुरस्कृतो भविष्यति।

तानाजिः- मया त्वीशकृपया विगतनिशायामेव स्वपुरस्कारो लब्धः। प्रभुनाऽहं महाराजस्य जीवनरक्षणे निमित्तं कृतम् । एतदस्ति मम

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
परमसौभाग्यम् ।

द्वारपालः- [प्रविश्य] जयतु महाराजः। एको बालको भवतां दर्शनमिच्छति ।

शिवराजः- तं सादरं प्रवेशय ।

[द्वारपालो बहिर्गच्छति]

मालोजिः- [प्रविश्य, साष्टाङ्गं प्रणम्य] महाराज ! अहमनुगृहीतोऽस्मि। भवतामौदार्येण मया स्वजननी दृष्टा। इदानीमहं मृत्युदण्डाय प्रस्तुतोऽस्मि ।

शिवराजः- काऽस्ति तवाऽन्तिमाऽभिलाषा ?

मालोजिः- मम जननी मरणासन्नास्ति यदि भवांस्तस्या अन्तिमसंस्कारस्य व्यवस्थां कर्तुं प्रसीदतु तदाऽहं सुखेन स्वप्राणांस्त्यक्ष्यामि ।

शिवराजः- तव पिता कुत्रास्ति ?

मालोजिः- स तु मम बाल्ये काल एव मृत आसीत् । अहं स्वजनन्या एव पालितोऽस्मि । मम कृत्येन साऽप्यतीव कुपिता आसीत् । महाराज ! इदानीमहं स्वमृत्युदण्डमिच्छामि ।

शिवराजः- [तस्य समीपं गत्वा तमाश्लिष्य च] यदि तव सदृशाय सत्यवादिने प्रायश्चित्तनिमित्तमुद्यताय वीरायाऽहं मृत्युदण्डं दास्यामि तर्हि महाराष्ट्रस्योद्धारः कथं भविष्यति? त्वमस्माकं सेनाया गौरवं भविष्यसि ।

मालोजिः- अनेन जीवनदानेनाऽहं पुनरप्यनुगृहीतोऽस्मि। [पादयोः पतति। शिवराजस्तमुत्थापयति।]

सर्वे-जयत्वस्माकं कृपालुर्महाराजः।

शिवराजः- [मण्डलेश्वरं प्रति] अस्य जनन्या उपचाराय क्षिप्रमेव राजवैद्यं प्रेषय। अनयोः सहायतार्थं राज्यकोषादेकसहसरूप्यकाणीदानीमेव दातव्यानि ।

रघुवीरसिंहः- यथाऽऽज्ञापयत्यस्माकं गुणग्राही महाराजः।

[पटाक्षेपः]

Funding by IKS-MoE

इति द्वितीयं दृश्यम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

[समाप्तमिदं शिवराजस्य गुणग्राहकता नाम लघुनाटकम् ।]

✦ बी-५८ वीथिसंख्या-३
उत्तरीछज्जूपुरम् , शाहदरा, दिल्ली
-११००८४

Funding by IKS-MoE

प्रेरकम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

-आचार्य मदनमोहन जोशी

स्वतन्त्रता दिवससमारोहे कतिचित् सैनिकछात्रा देशभक्तान् वीरान्स्मरन्तो गायन्ति-

स्वराज्यस्य च या देवी हृदिस्था सर्वप्रेरिका।
जननी देशभक्तानां तां स्मरामो वयं सदा ॥ १ ॥
येषां त्यागेन रक्तेन देशः स्वतन्त्रतां गतः।
देशभक्तान् च तान्सर्वान् प्रणमामो वयं मुदा ॥ २ ॥

सुधीरः-(अग्रे आगत्य राष्ट्रध्वजं प्रणम्य कथयति) सर्वे छात्राः सावधानाः भवन्तु श्रृण्वन्तु च । प्रथममहं वदामि पश्चाद् यूयं मिलित्वोच्चैस्त्रिवारं वदत । जयतु भारतम् ।

सर्वे- (उच्चस्वरेण) जयतु भारतं, जयतु भारतं, जयतु भारतम् ।

अहं वदामि क्रान्तिकारिणो देशभक्ताः यूयं वदत अमराःभवेयुः(त्रिवारम्)।

सुधीरः- क्रान्तिकारिणो देशभक्ताः

सर्वे-अमराः भवेयुः, अमरा भवेयुः, अमरा भवेयुः।

सुधीरः- **पीतं जलं च देशस्य**
भुक्तमन्नञ्च यस्य वै
रक्षकः को भवेत्तस्य
रक्षिष्यामो वयं मुदा,

सर्वे- रक्षिष्यामो वयं मुदा, रक्षिष्यामो वयं मुदा, रक्षिष्यामो वयं मुदा ।

सुधीरः- धन्यवादाः, भूरिशो धन्यवादाः।

शिक्षकः- सुधीर वत्स साधुवादः, सर्वे छात्राः साधुवादाः। आयुष्मन्तः प्रियाश्छात्राः । युष्माभिः देशरक्षा-व्रतं स्वीकृतम् ।

सर्वे छात्रा - आम श्रीमन् ! अस्माभिः स्वीकृतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

शिक्षकः– तर्हि वयं तान्देशभक्तान् प्रति श्रद्धाञ्जलिम् समर्पयामः।

छात्राः– नतमस्तका वयं तान्देशभक्तान्प्रति श्रद्धाञ्जलिं समर्पयामः।

शिक्षकः– वस्तुतः तान् प्रति श्रद्धाञ्जलिम् कीदृशी भविष्यति ?

सुधीरः– श्रीमन् ! अहं कथयामि, तान्प्रति श्रद्धाजलिरेषैव भविष्यति, यद् वयं प्रतिजानीम। सर्वे छात्रा दक्षिणं हस्तमग्रे कृत्वा वदत। प्रथममहं वदामि पश्चाद् यूयं वदत ।

सुधीरः– पदचिह्नानि तेषाञ्च

सर्वे– पदचिह्नानि तेषाञ्च

सुधीरः– अनुकुर्वन्तु जनाः सदा ।

सर्वे– अनुकुर्वन्तु जनाः सदा ।

सुधीरः– तदैव भारते देशे ।

सर्वे– तदैव भारते देशे ।

सुधीरः– सुखिनः स्युर्जना मुदा ।

सर्वे– सुखिनः स्युर्जना मुदा ।

अरुणः–(अग्रे आगत्य) भ्रातः किमस्माकमेषा प्रतिज्ञा सफला भविष्यति?

सुधीरः– अवश्यमेव सफला भविष्यति। किन्तु तव मनस्येष विचारः कथमागतः?

अरुणः– भ्रातः साम्प्रतं सर्वत्र स्वार्थपरायणा जना एव दृश्यन्ते। रक्षका एव भक्षकाः जाताः।

सुधीरः– कथम्? स्पष्टं कथय।

अरुणः– भ्रातः समाचारेषु दूरदर्शनादिषु अधिकारिणां नेतॄणां च विषये पठ्यते, दृश्यते, श्रूयते च। तदैव मम मनस्येष विचारः आगतः।

सुधीरः– वत्स सम्यक्कथयसि। किन्तु स्मर यत्र गुणास्तत्रैवावगुणाः अपि भवन्ति। सत्ययुगादेव देवासुरसंग्रामः प्रसिद्ध एव। अतो यत्र स्वार्थपरायणा भोगलिप्सवो भवन्ति तत्रैव बलिदानिनो निःस्वार्थिनोऽपि भवन्त्येव ।

Funding by IKS-MoE

विकासः– सत्यमुक्तं भवता। सर्वेषां हृदि सुबुद्धिः कुबुद्धिश्च वसतः। यत्र

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
सुबुद्धिस्तत्र निःस्वार्थिनो देशभक्ता भवन्ति। यत्र कुबुद्धिस्तत्र स्वार्थपरायणा लोलुपा भवन्ति। अतश्चिन्तयाऽलम् ।

सुकीर्तिः– भ्रातः यदि ते बलिदानिनो देशभक्ताः आगत्य स्वतन्त्रं भारतं पश्येयुस्तदा ते किं चिन्तयेयुः।

सुधीरः– ते चिन्तयिष्यन्ति यदद्यापि भारतस्य युवानः सैनिकाश्च बलिदानिभ्यः प्रेरणां गृह्णन्ति ।

सुकीर्तिः– कीदृशीं प्रेरणाम् ?

सुधीरः– देशरक्षायै प्रेरणाम् ।

स्वप्निलः– (मध्य एव) भ्रातो मयाद्यैकं विचित्रं स्वप्नं दृष्टम् ।

सुधीरः– स्वतन्त्रतासेनानिनां वार्तायां स्वप्नः कुतो आगतः?

स्वप्निलः– एषः स्वप्नोऽपि स्वतन्त्रतासेनानिनामेव

सुधीरः– शीघ्रं कथय तं स्वप्नम् ।

स्वप्निलः– (ध्यायन्) तं स्वप्नं तथैव वर्णयामि। पश्य तत्र चन्द्रशेखरः, भगतसिंहः, अशफाक उल्लाखानः सुखदेवश्च प्रार्थयन्तो दृश्यन्ते ।

ते सर्वे– **तेजस्विनी रणचण्डी शत्रुभ्यः कालरूपिणी ।**
लक्ष्मीबाई प्रसिद्धा या तां नमामो वयं पुनः ॥

खड्गहस्तां बलवतीं नेत्राभ्यामग्निवर्षिकाम् ।
स्वतन्त्रताप्रियां देवी लक्ष्मीबाई नुमो वयम् ॥

सहसा लक्ष्मीबाई प्रविश्य पृच्छति के यूयम्? किमर्थञ्च मां स्मरत?

चन्द्रशेखरः– (अग्रे आगत्य) नमामि खड्गधारिणीं प्रेरणादात्रीं लक्ष्मीबाईम् ।

लक्ष्मीबाई (दक्षिणं हस्तमुत्थाय)– यशोधनो भव स्वपरिचयं कथय ।

भगतसिंहः– (अग्रे आगत्य) अस्य परिचयमहं कथयामि–

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एषोऽस्ति मे पण्डितवंशदीपः
स्वस्थो युवा शेखरचन्द्र नामा ।
स्वतन्त्रता ह्येव च यस्य लक्ष्य-
माजादनामा भुवने प्रसिद्धः ।

लक्ष्मीबाई- (प्रसन्ना सती) धन्या वयम् । अस्य वीरस्य परिचयं प्राप्य धन्या वयम् । भवान् स्वपरिचयमपि कथयतु ।

चन्द्रशेखरः- अस्य परिचयं को न जानाति। येन देशस्य कृते वासन्तिकं वस्त्रं परिधाय स्वतन्त्रता परिणीता। पुनरपि अस्य परिचयः-

स एव भक्तः स च सिंह एव
बह्नौ च हस्तं ससुखं प्रतप्तम् ।
देशाय धर्माय समर्पितं च
धनं शरीरं सकलं सुखं वै ।।

लक्ष्मीबाई- (सगर्वम्) साधुवादः, वत्स साधुवादः। स्वतन्त्रतासंग्रामस्येतिहासे तव यशः पताका सर्वत्र दोलायमाना भवेत् । (अशफाकं प्रति) एष स्वस्थो युवा कः ?

भगतसिंहः- एष युवा-

को वाथ हिन्दुरथ मुस्लिमो वा
जानाति नैव नहि ज्ञातुमैच्छत् ।
देशो ममायमहमस्य चैव
सोऽयं ह्यशफाक उल्लेति खानः।

लक्ष्मीबाई- वस्तुतोऽस्माकं देशस्य परिचय एव 'समानी प्रपा सह वोऽन्नभागाः'' । सम्यक्कथितम् देशो ममायम् , अहमस्य चैव। वत्स चिरं स्थास्यति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
ते यशो वै ।

अशफाकः:- नमो देव्यै (इति कथयित्वा प्रणमति) देवि एष य मम पृष्ठे तिष्ठति सः क्रान्तिकारी देशभक्तः सुखदेवो वर्तते । स च-

हास्यप्रियो निश्छलजीवनश्च
दृढो विचारे समयानुकूली ।
स्वराज्यप्राप्तिः खलु यस्य ध्येयः
सुखदेव नामा खलु क्रान्तिकारी ॥

लक्ष्मीबाईः:- (प्रसन्नवदना) भवादृशानां बलिदानिनां त्यागेन साहसेन च भारतं स्वतन्त्रं जातम् पूर्णा नो मनोरथाः ।

चन्द्रशेखरः:- (शिरो विनम्य) प्रेरणादात्री तु भवत्येव, भवत्प्रेरणां बिनाऽस्माकं गतिः क्व? भवद्दर्शनेन कृतार्थाः वयम् , सफला वयम् , पूर्णमनोरथा वयम् ।

लक्ष्मीबाईः:- सुन्दरमति सुन्दरम् । गत्वा स्वतन्त्रं भारतं पश्यामः। किमाचरन्ति तत्रस्थाः स्वतन्त्रा भारतीयाः।

भगतसिंहः:- भारतीयाः स्वतन्त्रतां प्राप्य निरङ्कुशा जाताः। ते स्वार्थपूर्तये किमपि कर्तुं समर्थाः। त्यागस्य स्थानं लोभेन गृहीतम् ।

अशफाकः:- मयाऽपि श्रुतम् । ते जातिवादस्य छलेन भारतीयानां मध्ये कुबीजानि वपन्ति । आंग्लास्तु गताः किन्तु तेषां कुनीतयः स्वतन्त्रे भारते फलन्ति **'कलहेन राज्यम्'** । इति ।

सुखदेवः:- केचित्तु धनाय देशस्य गुप्तं रहस्यमपि विक्रेतुं तत्पराः। सर्वत्रानाचारो व्यभिचारो भ्रष्टाचारो दुराचारश्च चत्वारो भारतस्य गौरवं नाशयन्ति ।

लक्ष्मीबाईः:- धिक्तान्स्वार्थपरायणान् ।

चन्द्रशेखरः - अलं छिद्रान्वेषणेन । छिद्रान्वेषणमस्माकमुद्देश्यं न। पूर्वमपि मानसिहं जयचन्दादयो लोलुपानासन् । किम्? लोलुपैः सहेदानीमपि
Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानसिंहजयचन्दादयो लोलुप नासन् किम् ? लोलुपैः सहेदानीमपि देशभक्ता बलिदानिनो विराजमानाः सन्त्येव ।

लक्ष्मीबाई– सम्यक्कथयति चन्द्रशेखरः। छिद्रान्वेषणमस्माकमुद्देश्य न। यदस्माकं कर्तव्यमासीत् तदस्माभिः कृतम् । फलन्तु दैवाधीनम् । गीतावाक्यं स्मरत **'कर्मण्येवाधिकारस्ते'** इति ।

चन्द्रशेखरः– श्रूयते स्वतन्त्रभारतस्योपरि चीनदेशेन पाकिस्तानदेशेन च बहुश आक्रमणाः कृताः।

भगतसिंहः– एतत्तु सत्यम् । तत्रापि भारतीयाः सैनिकाः अग्रे आगत्य देशं रक्षितवन्तः।

अशफाकः– मया तु श्रुतम् । एकेन देशभक्तेन स्वप्राणचिन्तां विहाय सिंहगर्जनं कृतम् ।

भगतसिंहः– सिंहगर्जनम् ?

अशफाकः– केन उक्तम् । वयं तस्य देशवासिनो सैनिकाः स्म यत्र चन्द्रशेखरादयो बलिदानिनो देशभक्ताः जाताः। स्मरत चन्द्रशेखरेण कथितम्–

शत्रूणां गोलिकाभिस्तु न बिभेमि कदाचन ।
स्वतन्त्रोऽस्मि स्वतन्त्रो हि भविष्यामि युगे युगे ॥

भगतसिंहः– यद्येवं तर्हि सफलमस्माकं बलिदानम् । यस्य प्रेरणया भारतस्य सुपुत्राः देशं रक्षन्ति। तत्रत्यं पुष्पमप्यभिलषति

चन्द्रशेखरः– किमभिलषति पुष्पम् ?

भगतसिंहः– पुष्पमभिलषति यत्–

त्रोटय त्वं हे मालाकार ! तत्पथि शीघ्रं क्षेपय माम् ।
देशरक्षिका सेना यत्र तच्चरणान्प्रणमाम्यहम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
चन्द्रशेखरः- यदि भारतस्य पुष्पस्येदृशी भावना विद्यते तर्हि भारतस्य सुपुत्रास्तेनैव प्रेरिताः भविष्यन्ति।

प्रभो देशभक्तास्सुतास्ते भवन्तु
स्वप्राणैश्च रक्षन्तु ते देहवत्तम् ।
वसेद् भारते देशद्रोही न कोऽपि
भवेन्नाट्यमेतत्सदा प्रेरणार्थम् ॥

स्वप्निलः- मम स्वप्नस्तु एतादृशः आसीत् ।

सुधीरः- भवत्स्वप्नस्तु स्वतन्त्रताप्रेरको वर्तते। प्रार्थये सर्वशक्तिमन्तं भगवन्तम् ।

भारतीया सदैवैतादृशं स्वप्नं पश्येयुः तथा च तेनैव प्रेरिताः भवेयुः। मया सह सर्वे त्रिवारं वदन्तु-जयतु भारतम् जयतु भारती, जयतु भारतं जयतु भारती, जयतु भारतं जयतु भारती ।

सर्वे वदन्तिः- जयतु भारतं जयतु भारती ।

शिक्षकः- आयुष्मन्तश्छात्राः? भवन्त एव भारतस्याशाकलिकाः स्युः। नाटकमिदं भवत्प्रेरणार्थं भवतु। मम शुभाशीर्वादाः सदैव युष्माभिः सह सन्ति । गच्छन्तु स्वगृहम् । शुभास्ते सन्तु पन्थानः। (सर्वे गच्छन्ति)

✦ १००/६ भजनपुरा,
दिल्ली ११००५३

Funding by IKS-MoE

वयं भारतीयाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

-श्री सन्तोष कुमार गुप्ता

(ततः प्रविशति अध्यापकः कक्षायां सर्वे छात्रा आदरार्थम् उत्तिष्ठन्ति)

अध्यापकः:- भो छात्राः! अद्याहं सामान्यज्ञानविषयकं प्रश्नं पृच्छामि। आफताब, कथं महात्मनो बुद्धस्य चरितविषये त्वं किं जानासि ।

आफताबः:- महात्मा बुद्धः बाल्यादेव अतिचिन्तनशीलः, परमकारुणिकश्चासीत् । संसारगतदुःखस्य परिहारः कथं स्यादिति सदैव चिन्तयति स्म, सः धार्मिकपाखण्डस्य खण्डनं चकार। महात्मनो बुद्धस्योपदेशाः सर्वसाधारणस्य कृतेऽपि उपादेयाः सिध्यन्ति। अहिंसा-सत्यास्तेय-ब्रह्मचर्या-परिग्रहा इति पञ्चधर्माः तेन मनुष्याणां कृते निर्धारिताः।

अध्यापकः:- जसविन्दर ! ईसामसीहः मानवान् किमुपादिशत् ।

जसबिन्दरः:- ख्रिष्टधर्मप्रवर्तकः ईसामसीहः आर्त्तजनानां आर्तिहरणाय निर्धनजनानां कल्याणाय,रोगपीडितानां च परित्राणाय लोकमुपदिशति स्म। यथा विद्वेषो विद्वेषं, विरोधो विरोधं जनयति तथैव स्नेहः स्नेहं वर्धयति। यदि कश्चिद् जनोऽस्माकं हानिं जनयति तदा तस्य प्रतीकारो वैरबुद्ध्या न कर्तव्यः। मानवतायाः सेवैव भगवतः सेवेति तस्योपदेशवचनानि सन्ति। सः दीनदुःखितानां सेवायामेव ईश्वरस्य साक्षात्कारं करोति स्म ।

अध्यापकः:- दीपक ! गुरुगोविन्दसिंहः किमर्थं पूज्यः?

दीपकः:- सिखधर्मस्य दशमो गुरुः गुरुगोविन्दसिंहः जन्मेभूमेः रक्षार्थं देशभक्तिभावनया आत्मोत्सर्गमकरोत् । तेन वीरतायाः, त्यागस्य आत्मोत्सर्गस्य चाप्रतिमं निदर्शनमपि कृतम् ।

कक्षा विसर्जिता मध्याह्नसमयः सञ्जातः,

छात्राः स्वल्पाहारार्थम् इतस्ततः तिष्ठन्ति ।

आफताबः:- दीपकजसबिन्दरौ आगच्छतम् । वयं भोजनं करिष्यामः

(दीपकः तस्मै प्रत्युत्तरं न ददाति अपित्वपसर्पति)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जसबिन्दरः–(सर्वेषां बालकानां मुखान्यवलोकयति, अश्रूणिचप्रवाहयति) अद्य मम माश्र्वे भोजनाय किञ्चिदपि नास्ति । निर्धनोऽहं क्षुत्प्रपीडितोऽस्मि। (इति रोदिति)(आफताबः तं समाश्वासयति। पीटरः च स्वभोजनं जसबिन्दराय ददाति । क्षुत्प्रपीडितो जसबिन्दरः भोजनं करोति।)

कतिपयदिवसानन्तरं परीक्षासारिणीं दृष्ट्वा ते परस्परं वार्तालापं कुर्वन्ति।

जसबिन्दरः– अर्द्धवार्षिकी परीक्षा अतिनिकटास्ति किन्तु मम पाश्र्वे परीक्षा–शुल्कप्रदानाय धनं नास्ति । मम पिता अकस्मात् अतिरुग्णः जातः। यत्किञ्चिदपि द्रव्यं मम पाश्र्वे आसीत् तदपि तस्य चिकित्सायां व्ययितम् ।

पीटरः– अहं तव परीक्षाशुल्कं दास्यामि। भगवतः प्रसादेन मम पितुः पाश्र्वे प्रभूतं धनं वर्तते ।

जसबिन्दरः– अद्य दीपको न लक्ष्यते। कदाचित् सः विद्यालयं नागतः। मन्ये, सः चलचित्रावलोकनाय गतः स्यात् ।

पीटरः– मैवं भण, अद्य केनापि दुष्टबालकेन तस्योपरि बमप्रक्षेपः कृतः तीव्रया रुधिरधारया तस्य मुखं रञ्जितमासीत् । तस्य शल्यचिकित्सायाः कृते रक्तमपेक्षते किन्तु तद्वर्गस्य रक्तं दीपकस्य रक्तेन सह साम्यं न भजते। अपरः कोऽपि जनः स्वकीयं रुधिरं दातुं न तत्परः। येन केनापि व्याजेन जनाः विरमन्ति ।

आफताबः– किमिदम् । हन्त ! दीपकोपरि बमप्रक्षेपः। महत् कष्टम्। तर्हि अहं शीघ्रमेव तं द्रष्टुमिच्छामि ।

जसबिन्दरः– सन्तोषस्य विषयः यत् परमेश्वरस्य प्रसादेन सः जीवति ।

पीटरः– तस्य शल्यचिकित्सा रक्तमपेक्षते । रक्तं कुतः लब्धं स्यात् साम्प्रतमिदं चिन्तनीयम् किन्तु दुष्करमिदं प्रतिभाति ।

आफताबः– अहं स्वप्राणान् पणीकृत्यापि तस्य जीवनं रक्षिष्यामि। किन्तु शीघ्रंकरणीयमिदं कार्यम् । अयमहं रक्तदानाय प्रस्तुतः। पीटर ! दीपकः इदानीं कुत्रास्ति? किमिदं जानासि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(आफताबः जसबिन्दरेण सह चिरञ्जीवचिकित्सालये गच्छति। दीपकः तत्र पर्यङ्कोपरि अर्धचेतन इव दृश्यते। चिन्तानिमग्नौ तस्य पितरौ तमुभयतः तिष्ठतः)

आफताबः- प्रविश्य, समीपमुपसृत्य अभिवादयति ।

जसबिन्दरः- नमस्करोम्यहम् ।

(दीपकस्य पिता आशीर्वचनं ददाति, तस्य माता अश्रूणि मुञ्चति)

आफताबः- तात समाश्वसिहि।

जसबिन्दरः- धैर्यं न त्याज्यं विधुरेऽपि काले। भगवतः प्रसादेन सर्वं कुशलं भविष्यति ।

दीपकस्य पिता (समीपमुपसृत्य):- वत्स दीपक ! इमौ तव सुहद्वरौ समायातौ।

दीपकः- (पार्श्वान्तरं विधाय, अवलोक्य च) स्वागतम् (इत्यर्धोक्ते एव मूर्छति)

आफताबः- अहं रक्तदानाय आगतोऽस्मि ।

दीपकस्य माता- किं तस्मै स्वकीयान् प्राणान् दातुं समुद्यतः?

दीपकस्य पिता- इयं भवतः महती अनुकम्पा किन्तु ।

आफताबः- (वचनमाक्षिप्य) इदानीं प्राणानां मोहः नैव कर्त्तव्यः। मित्रमेव जनस्य सर्वदा साहाय्यं विदधाति, सर्वं मनस्तापम् आधिं व्याधिं वा हरति ।

(ततः चिकित्सकः आगच्छति, आफताबस्य रक्तनिरीक्षणं करोति च। तस्य रक्तं दीपकस्य रक्तवर्गस्यैव निर्गच्छति। आफताबः सहर्षं स्वरक्तं दीपकाय ददाति, तस्य जीवनमेवं रक्षति। सर्वे आनन्दमनुभवन्ति ।)

दीपकः- मित्र आफताब ! साधु, श्लाघनीयम् तवाचरणम् । त्वं वस्तुतः मम सन्मित्रमसि ।

"आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।"

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(कतिपयदिवसानन्तरं आफताबः दीपकस्य गृहं गच्छति।)

जसबिन्दरः- मित्र दीपक ! श्वः मम ईदमहोत्सवो भविष्यति। किं त्वं मम गृहम् आगमिष्यसि।

दीपकः- अवश्यमेव आगमिष्याम्यहम्। मित्र ! अहंतु पूर्वमेवलज्जितोऽ-स्मि। मया त्वया सह समुचितं नाचरितम्।

(सुन्दराणि वस्त्राणि धारयित्वा तस्य मित्राणि आफताबस्य गृहं गच्छन्ति। तत्र ते परस्परमालिङ्गन्ति। आफताबः तान् दीर्घसूत्रिकामिष्टान्नानि भोजयति)

दीपकः- ईदमहोत्सवः जनेषु भ्रातृभावं वर्धयति, वर्गभेदं जातिभेदं धनिकनिर्धनभेदं च दूरीकरोति। दिवसेऽस्मिन् जनाः परस्परद्वेषभावं विहाय 'सर्वे वयं भ्रातरः' इति शोभनभावनया परस्परमालिङ्गन्ति।

(ते सर्वे स्वगृहं गच्छन्ति)

(कतिपयमासानन्तरं होलिकोत्सवः आयाति। आफताबः होलिकायाः साधुवादं दातुं दीपकस्य गृहं गच्छति।)

दीपकः- मित्र आफताब ! माम् गाढं परिष्वज। (तौ प्रीत्या परस्परमालिङ्गतः। दीपकः तं विविधानि व्यञ्जनानि भोजयति।)

आफताबः- होलिकोत्सवस्य उल्लासमयः कालः कस्य मनो नावर्जयति। सकला गृहवीथिकामार्गाः मनोहरगुलालादिरञ्जनरागरञ्जिताः भवन्ति।

दीपकः- सत्यमेव। गगने पटवासः प्रसरति, मनसि प्रीतिः जायते। जनाः 'पिचकारीयन्त्रेण' जनेषु न केवलं अबीरगुलालकुङ्कुमादीनां रागानां जलं प्रक्षिपन्ति, अपितु स्नेहस्य वृष्टिं कुर्वन्ति।

आफताबः- यथा ईदमहोत्सवे तथैव होलिकोत्सवेऽपि जनाः परस्पररागद्वेषादीन् परित्यज्य महता सौहार्देनं परस्परमालिङ्गन्ति। महोत्सवोऽयं जनेषु प्रेमभावं सद्भावं च जनयति।

दीपकस्य पिता- भो बालकाः! विविधानां धर्माणां मार्गाः विविधाः किन्तु तेषां गन्तव्यमेकमेव। सर्वेषां जनानां शिरासु समानमेव रक्तं प्रवहति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

संसारस्य सर्वेऽपि मानवाः समानाः। सर्वेषां धर्माणां सारभूततत्त्वानां एकत्र सञ्चयेनैव विश्वधर्मः सम्भवति।

"ईश्वरः सर्वभूतानाम् हृद्देशेऽर्जुन तिष्ठति"

इति गीतायामप्युक्तम्

(पटाक्षेपः)

✦ ग्रामः महशपुरम् मिठारी रोडः
पो॰ इण्डस्ट्रियल एस्टेटः
जनपदम्–वाराणसी, उ॰ प्र॰

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूर्खताऽनर्थकारिणी

-आचार्य बाबूराम अवस्थी

प्रथमं दृश्यम्

(निरक्षरो ग्रामीणो युवा हलधरः प्रविशति)

हलधरः- (उच्चैः) मित्रगोवर्धन, हे गोवर्धन !

गोवर्धनः- (प्रविश्य) अहो ! मित्र हलधर ! आगच्छ !

हलधरः- मित्र गोवर्धन ! कथाया निमन्त्रणं प्राप्तम् । तत् कस्मिन् समये कथा भविष्यति ?

गोवर्धनः- मित्र हलधर ! अधुनैव भविष्यति । विलम्बो नास्ति । त्वं समये समागतोऽसि ।

हलधरः- किन्त्वत्र कापि व्यवस्था न दृश्यते ।

गोवर्धनः- व्यवस्था कथं नास्ति? किं न पश्यसि, निम्बतरुतले मण्डपस्तत्र व्यासासनमस्ति। इमे श्रोतारो दूरदूरादागताः। त्वमप्युपविश ।

हलधरः- किं पण्डित आगतः? कस्य कथा भविष्यति ?

गोवर्धनः- पण्डितस्तु रात्रौ एवागतः। सम्प्रति देव-पूजाम् उदरपूजां च करोति। स भागवतीं कथां कथयिष्यति। (विलोक्य) एष पण्डितमहोदयः इत आगच्छति। अहमपि तावदासनं पुष्पमाल्यानि चानयामि ।

(गत्वाऽऽसनं पूजासामग्रीं चानीय स्थापयति। ततः प्रविशति पण्डितः)

गोवर्धनः-(पण्डितं प्रति)आगच्छतु पण्डितमहोदय! आसने तिष्ठतु भवान्।

(पण्डित उपविशति पुस्तकं चोद्घाटयति)

हलधरः- पण्डितमहाराज ! नमस्करोमि ।

पण्डितः- सुखी भव ! भक्त ! उपविश ।

(हलधरगोवर्धनावुपविशतः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रेष्ठी लक्ष्मीनाथः- (प्रविश्य) विप्रवर ! प्रणमामि ।

पण्डितः- सानन्दो भव । भक्त ! त्वमपि उपविश ।

(श्रेष्ठी लक्ष्मीनाथो व्यासासनस्य निकटे उपविशति। भृत्यो वाहकश्चागत्य तिष्ठति)

गोवर्धनः- हे पूज्य पण्डित महोदय ! भवान् कथारम्भं करोतु ।

पण्डितः- हे हे श्रोतारः! अथ भागवती कथा प्रारभ्यते। अधुनाऽहं विज्ञापयामि यद् भगवद्भक्तस्य किं लक्षणं भवति । श्रृणुत-

श्रृण्वन् सुभद्राणि रथाङ्गपाणेर् -
जन्मानि कर्माणि च यानि लोके ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः॥

अर्थात् कृष्णकथा श्रवणेन यस्य नेत्रयोरश्रूणि वहन्ति, शरीरं रोमाञ्चितं भवति तथा यो भावमग्नः सन् रोदिति, स भगवद्भक्तो भवति ।

(अत्रान्तरे हलधर नामा श्रोता दीर्घं श्वसन् रोदितुमारभते । तमवलोक्य पण्डितः कथयति)

पण्डितः- अहह ! ग्रामवासिनः श्रोतारः पश्यन्तु। अस्यां सभायाम् अयं श्रोता भगवद् भक्तोऽस्ति। कृष्णनामस्मरणेनैव द्रुतचितः सन् रोदिति। (हलधरं प्रति) भो भक्तराज ! तव हृदये को भावो जागृतः? कथय ।

हलधरः- (रुदन्नेव) श्रीमन् ! मम गृहे पालितः एको नवजातो महिषीपुत्रः अर्थात् भाषायां 'पँड़वा' इत्यासीत् । स वराको महिषीसुतो मृतः। तव स्वरस्तस्य स्वरेण पूर्णतया मिलति। श्रुत्वा तं संस्मृत्य दुःखेनाहं रोदिमि। अहह .... (इत्युच्चैः रुदन्नुत्थाय निर्गच्छिति)

पण्डितः- (मस्तकमाहत्य) अहो दुर्भाग्यम् । आस्तां तावत् । हे हे भक्तजनाः। अग्रे कथां श्रावयामि। भवन्तो ध्यानेन श्रृण्वन्तु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥"

अर्थात् मनुष्यस्य मनोऽतिचञ्चलं भवति। कथाश्रवणसमये पूजापाठकाले पठनपाठनवेलायां सत्संगे च निजं चित्तं हठात् श्रीभगवतश्चरणारविन्दयोः संलग्नं कर्तव्यम् ।

(अत्रान्तरे श्रेष्ठी लक्ष्मीनाथोऽकस्माद् व्यासासनस्य वस्त्रं विदारयति। सर्वे सम्भ्रान्ता भवन्ति। श्रेष्ठी लज्जितः सन् सर्वेषां मुखं पश्यति)

पण्डितः– भो लक्ष्मीनाथ श्रेष्ठिन ! किमिदं त्वया कृतम्? आसानं किमर्थं विपाटितम्?

लक्ष्मीनाथः– (उत्थाय) विप्रवर ! क्षम्यताम् । अहं विचारमग्नोऽभवम् , यदहं स्वविपणौ वस्त्रं विक्रीणामि। ग्राहकास्तिष्ठन्ति। एकेन ग्राहकेन मीटरद्वयं वस्त्रं क्रीतम् , तन्मया विपाटितम् । सर्वे–धन्योऽसि, धन्योऽसि (इति हसन्ति, श्रेष्ठी चाधोमुखो निर्गच्छिति)

पण्डितः– हे हे कथाकर्णनकौतूहलिनः श्रोतारः! अधुनाहं वेदमन्त्राणां व्याख्यां करोमि। वेदे लिखितमस्ति–

'ब्राह्मणोऽस्य मुखमासीद्'

तथा

'मुखादग्निरजायत इति ।'

अर्थाद् ब्राह्मण ईश्वरस्य मुखं भवति। ब्राह्मणस्य मुखेऽग्निर्वसति। अत एव स पूजनीयो भवति ।

(गोवर्धनो निद्रावशीभूतो निर्गच्छति। वाहकम् उपविष्टं विलोक्य पण्डितः पृच्छति)

Funding by IKS-MoE

पण्डितः– भो भक्त ! सर्वे श्रोतारो गताः। एकस्त्वमेव तिष्ठसि। अतस्त्वं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमभक्तोऽसि ।

वाहकः- पण्डित महाराज ! नाहं भक्तः। इदमासनं मया नीत्वा गृहे स्थापनीयमस्ति। त्वमासनं मुञ्च ।

पण्डितः- ओम् , ओम् । आसनं मुञ्चामि ।

(पण्डितो व्यासासनादवतरति। वाहकश्च आसनमुत्थाप्य नयति)

पण्डितः- (इतस्ततो विलोक्य) सर्वे स्वपन्ति। अहमपि तावदत्रैव शये ।

(इति तत्रैव शेते । जवनिका पतति)

द्वितीयं दृश्यम्

(ततः प्रविशति गतनिद्रो गोवर्धनः। धूम्रवर्तिकां दीपशलाकां च निष्कासयति ।

गोवर्धनः- धूम्रपानं कर्तुमिच्छामि। वर्तिकां पिबामि। (वर्तिकां मुखे कृत्वा शलाकां दीपयति। वायुवेगेन सा शाम्यति)

गोवर्धनः- अहो ! शलाकाः समाप्ताः किं करोमि। (रिक्तं शलाकाचोलकं कम्पयित्वा क्षिपति। पुनर्विचिन्त्य)

गोवर्धनः- अहो ! ज्ञातम् । पण्डितमहोदयेन कथितमासीद् यद् ब्राह्मणस्य मुखेऽग्निर्भवति पण्डितो ब्राह्मणोत्रैव स्वपिति। तस्य मुखेऽग्निना वर्तिकां दीपयामि ।

(पण्डितस्य समीपे शनैर्गत्वा दृष्ट्वा च मुखेन तस्य मुखे फूत्करोति। पुनरङ्गुल्या अधरमुद्घाटयति, अन्तः पश्यति यत् कुत्रास्तेऽग्निः। पण्डितोऽर्धनिद्रः स्वमुखं विकृतं करोति। हस्तेनाधरं प्रोञ्छति। पुनः स्वपिति। ततो गोवर्धनः कर्गदिस्य शलाकां निर्माय पण्डितस्य मुखे विलिखति । स चोत्तिष्ठति)

पण्डितः- (उच्चैः) चौरश्चौरः, भूतो भूतः। त्राहि माम् (शब्दं श्रुत्वा हलधर-वाहक-लक्ष्मीनाथाः प्रविशन्ति)

Funding by IKS-MoE

पण्डितः- (गोवर्धनं वीक्ष्य) अयं मम मुखे कीलं प्रावेशयत् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्ष्मीनाथः- गोवर्धन ! त्वं मुख्यो यजमानः, पण्डितस्तव पूजनीयः। अस्य मुखे कीलं कथं कृतवान्?

गोवर्धनः- पण्डितेन कथितमासीद् यद् ब्राह्मणस्य मुखेऽग्निर्वसति। अतोऽहं धूम्रपानार्थं वर्तिकां दीपयितुं पण्डितस्य मुखे अग्नेरन्वेषण-मकार्षम् । (सर्वे हसन्ति। पण्डितः क्रुद्धस्तिष्ठति)

हलधरः- मित्रगोवर्धन ! पण्डितस्य चरणौ स्पृष्ट्वा क्षमायाचनं कुरु ।

गोवर्धनः- (हस्तौ संयोज्य) पण्डितमहोदय ! ममापराधं क्षमस्व ।

पण्डितः- अहमधुना अस्मिन् ग्रामे कथां न कथयिष्यामि। अत्र अशिक्षिता मूर्खा वसन्ति। मूर्खता चानर्थकारिणी भवति ।

हलधरः- विप्रवर ! वयम् अशिक्षिता इति सत्यम् , किन्तुश्रद्धाविरहिताः न स्मः। अस्माकं श्रद्धां भक्तिं च विचार्य कृपां कुरु ।

पण्डितः- ओम् । तव वचनं मह्यं रोचते। अहं विचारयामि यद् अशिक्षानिवारणाय प्रतिदिनं प्रथमम् अक्षरज्ञानं ततो विद्यादानं करिष्यामि। भवन्तो व्यापृतजीवनात् समयं निष्कास्य शिक्षां गृह्णन्तु। तदा श्रद्धा-भक्तिमयं जीवनं शोभिष्यते। अहमपि विद्यादानाद् धन्यो भविष्यामि।

सर्वे-ओम् , ओम् । अनुगृहीता वयम् ।

पण्डितः- **शिक्षा यशस्करी लोके**
सत्यासत्यप्रदर्शिनी ।
प्रगतिजीविनस्येयं
मूर्खतानर्थहारिणी ॥

(जवनिका पतति)

✦ वाजपेयी कालोनी,
लखीमपुरम् खीरी-२६२७०१

उ० प्र०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कण्वस्य दुहितृवियोगः

-ओम् प्रकाश ठाकुरः

प्रथमं दृश्यम्

स्थानम्- कण्वाश्रमसमीपे वनैकदेशः। (ततः प्रविशति सखीभ्यां सहिता शकुन्तला)

सर्वाः-(हस्तौ संयोज्य) परितः कीर्णसौन्दर्यामष्टमूर्तिसुशोभितां मातरं मङ्गलानां च प्रकृतिं सादरं नुमः।।

शकुन्तला- सख्यौ ! पश्यतं कुसुमसमृद्धिरमणीयशोभं वनमिदम् । एताः सन्ति शेफालिकामल्लिका-यूथिकाश्च मम दक्षिणेन, एते च बकुल-चम्पक-कर्णिकाराः मम वामतः।

अनसूया- किं विस्मृता त्वया वनज्योत्स्ना ?

शकुन्तला- कथं विस्मरिष्यामि लताभगिनीं वनज्योत्स्नाम् । सैषा मध्यवेदिकायां विराजते ।

प्रियंवदा- दिष्ट्या अद्य वयं पादपसेचनात् मुक्ताः स्मः। रात्रौ एव करुणापरैर्मेघैः निष्पादितमस्मत्कार्यम् ।

शकुन्तला- प्रियंवदे ! अहन्तु पादपानां सेचने कमप्यायासं नानुभवामि। सर्वेऽप्येते मम बन्धुभूताः। एतान् परिषिच्य आनन्दमेव लभे ।

अनसूया- आलि ! जानीमो वयं तावकीनं प्रगाढमनुरागमेतेषु। आश्रम-मृगेष्वपि तव पुत्रवात्सल्यं पश्यामः। तेऽपि त्वत्करदीयमान-शष्प-प्रतीक्षायां तवोटजं परिक्रामन्ति ।

शकुन्तला- श्रुतं सर्वम् । सम्प्रति इतोऽपि क्षणं दृष्टिं प्रेरयतम् । इदानीमेव प्रवृत्तेन समीरणेन आन्दोलितानां प्रसूनलतानां पश्यतं चारुनर्तनम् ।

प्रियंवदा- हला शकुन्तले ! मन्ये त्वदीयं हृदयमपि एताभिः साकं नृत्यति।

अनसूया- कथं न नर्तिष्यति ! जानासि किम् अद्यैव मध्याह्ने आवयोः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
प्रियसखी पत्युर्गृहं यास्यति। हा हन्त! कीदृशी नियतिरियं कन्यकानाम्-

यस्मिन् गृहे कुले जाता:
पोषिता: स्नेहवर्धिता:।
तद् विहाय गृहं क्षिप्रं
प्रयान्त्येता नवाश्रयम् ।।

(तत: प्रविशति ब्रह्मचारी)

ब्रह्मचारी- (सर्वा: प्रति) अहो ! अस्मिन् लता-निकुञ्जे अवस्थानं व:। क: काल:, युष्मान् अन्विष्यामि। मान्य: कुलपति: सर्वा व: आकारयति प्रस्थानमङ्गलं करणीयमिति। त्वरितं चलत मया साकम् ।

(सर्वे आश्रमाभिमुखं प्रयान्ति)

द्वितीयं दृश्यम्

गौतमी- (शकुन्तलां वीक्ष्य) एहि जाते एहि। त्वां प्रतीक्षामहे वयम् । इदानीमेव यज्ञानले कृतस्वस्त्ययनं तातं वन्दस्व ।

शकुन्तला- (सलज्जम्) तात ! वन्दे ।

कण्व:- पुत्रि ! सौभाग्यवती भवापत्या सह स्वधर्मपालने तत्परा सती चक्रवर्तिनं पुत्रमाप्नुहि। इतो यज्ञवेदिमुपगम्य परिक्रमां विधेहि। एते यज्ञवह्नय: त्वां पावयन्तु मङ्गलं च दिशन्तु ।

शकुन्तला- अनुगृहीताऽस्मि ।

गौतमी- वत्से ! नायमाशीर्वाद:, अपितु वरदानम् । (अनसूयां प्रियंवदां च प्रति) कृतयज्ञवेदिपरिक्रमां शकुन्तलां कुटीराभ्यन्तरे नयतम् अस्या: मण्डनविधिं च सम्पादयतम् ।

उभे- कुतस्तावदरण्ये मण्डनानि ?

गौतमी- (सस्मितम्) गत्वा पश्यतं सकलं मण्डनं सन्निहितं तत्र। कुलदेवतानां प्रसादात् लब्धं सर्वम् ।

उभे- आर्ये आश्वस्ते आवाम्। किमसाध्यं तपसाम्? अचिरणैव प्रियसखीं

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वस्त्रालङ्करणैरलङ्कुर्वः।

कण्वः- (शार्ङ्गरव-शारद्वतौ प्रति) युवाम् आर्यया गौतम्या सहितौ भगिनीं शकुन्तलां पत्युः दुष्यन्तस्य प्रापयतम्।

(गौतमीं प्रति) आर्ये! अद्य अवगच्छामि दुहितृविप्रयोगः कीदृशः भवति इति। मम हृदयं करुणयाऽऽकुलितं, नयने जडीभूते, कण्ठः सगद्गदः। चिन्तयामि वनस्थस्य वीतरागस्य मे यदि ईदृशी दशा, गृहस्थानां का दशा भविष्यति।

गौतमी- धैर्यं धारयतु मतिमान्। शकुन्तलया उपस्थितवियोगस्य तपोवनस्य दशां विलोकयन्त्या मे नेत्रे पर्यश्रुणी जाते। हृदयं क्रन्दतीव। विलपनैरपि किम्?

कण्वः- सत्यं कथयति भवती। पश्यतु पश्यतु। धृतमौनेव शान्ता सर्वा प्रकृतिः। पाण्डुपत्रपरित्यागव्याजेन अश्रूणीव मुञ्चन्ति लताः। अहो, अकम्पा तरूणां पत्राली।

(शकुन्तलां प्रति) वत्से! उपनतायां प्रस्थानवेलायाम् आपृच्छस्व सखीजनम्।

शकुन्तला- (सवाष्पगद्गदकण्ठम्) सख्यौ। युवां सममेव मां परिष्वजेथाम्।

सख्यौ- (आश्लिष्य) मा तावदावां विस्मरिष्यसि।

शकुन्तला- नैव विस्मरिष्यामि। युवाम् अपि मम वनज्योत्स्नां न विस्मरिष्यथः।

उभे- किम् आवयोः विषयेऽपि चिन्तितं त्वया? (रुदितः)

कण्वः- अलं रुदित्वा। आश्रमवियोग-व्याकुलां स्वसखीं युवामेव स्थिरीकुरुतम्।

शार्ङ्गरव-शारद्वतौ- भगिनि शकुन्तले! अति-क्रामति प्रस्थानवेला। त्वरतां भवती।

शकुन्तला- (बद्धाञ्जलिपुटा) अयि मातः वनबान्धवाः!

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
AWSSBAB
BVBSSMV

फलैर्मूलैर्दलैर्नित्यं
छायया चापि सन्ततं।
परेषां हितसंलग्नान्
वो नमामि पुनः पुनः॥

कण्वः- वत्से ! सुखिनी भूयाः।
शिवास्ते सन्तु पन्थानः॥

(गौतम्या शिष्याभ्यां च सहिता शकुन्तला परिक्रामति)

✦ डी-७५७ सरस्वतीविहारः,
दिल्ली-३४

Funding by IKS-MoE

७१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"सुमुहूर्ते सावधानम्"

-डॉ॰ वेणीमाधवशास्त्री भा॰ जोशी

पात्राणि

केशवरायः	:	कन्यायाः राधायाः पिता
राधा	:	वधूः
मङ्गला	:	वध्वः सहोदरी
दामोदरः	:	वध्वः मातुलः
शकुन्तला	:	वध्वः सखी
श्रीधरः	:	वध्वः भ्राता
उग्रपतिः	:	वरस्य मित्रम्
भीमरायः	:	वरस्य पिता
श्रीनाथः	:	वरः
प्रभावती	:	वरस्य मातुलानी
पुरोहितः		

(विवाह-सन्दर्भः। गृहस्य समीपे एव विवाह-मण्डपः, दूरतः मङ्गलवाद्यं श्रूयते)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(नेपथ्ये)

नमस्तुलसि कल्याणि नमो देवि दयानिधे ।
अनाथरक्षके साध्वि त्राहि मां सर्वसङ्कटात् ॥ १ ॥

केशवरायः– (चिन्तासनात् सहसा उत्थाय) अरे ! राधायाः नमोवाकः श्रूयते। गतदिने रजनीमुखे वरबान्धवानां प्रत्युद्गमनं तु निर्विघ्नं निर्वर्तितम् । परमद्य तु 'सुमुहूर्ते सावधानमिति' मंत्रपठनसमये वरदक्षिणायाः कृते तेषां वरबान्धवानां हठनिबन्धश्चेत् किं करोमि मन्दभागः!

इयं समस्या वरदक्षिणायाः प्ररूढमूला विषवल्लरीव ।
दिने दिने तां च विवर्धमानां छेत्तुं समर्था न वयं हताशाः॥ २ ॥

इदानीमपि द्रव्यानुकूल्यं नैव घटितम् । अरे, मङ्गलया सह राधा इत एवाभिवर्तते। भवतु अन्यत्र गमिष्यामि। गच्छति

(प्रविश्य)

राधा – मङ्गला भगिनी मम सखी शकुन्तला इति अस्ति किल, या च मम स्नातकाध्ययने सहाध्यायिनी आसीत् सा इदानीमपि नैव समागता वा

मङ्गला – जानाम्यहं परम् अत्र तु नैव दृष्टवती ताम् ।

राधा – द्वित्राण्यहानि पूर्वमेवागमिष्यामीत्युक्तमासीत् तया ।

मङ्गला – राधे पश्य ! पश्य ! एषा ते सखी शकुन्तला आगतैव । पश्य

शकुन्तला – राधे ! किं रे विवाहप्रसाधनादिना अतीव चारुतरा लक्ष्यसे ।

राधा – सखि अलमतिविस्तरेण ।

शकुन्तला – नहि रे अहमेवं चिन्तयामि, यदि अहमेव वरः स्यां तदा.....

(सर्वे हसन्ति)

राधा – शकुन्तले अनन्तरं भवतु तव वर्णनाचातुरी, प्रथमं प्रसाधनादिना सज्जीभव ।

मङ्गला – भवतु । अहमेव नेष्यामि ताम् । (उभौ गच्छतः)

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राधा - विवाहसन्दर्भेऽपि अहमेकाकिनी संवृत्ताऽस्मि। (निमित्तं सूचयित्वा) अहो कथमिदं नाम-वामेतरं नयनं मे स्फुरति। किमिति वाद्यध्वनिः स्थगिता लक्ष्यते। भवतु सखीं नीत्वा यास्यामि । (इति गच्छति। वाद्यध्वनिः स्थगितः, ततः प्रविशति दामोदरः श्रीधरः मङ्गला च ।)

मङ्गला - दामोदर मातुल! मङ्गलवाद्यं किमिति स्थगितं वर्तते ।

दामोदरः - मङ्गले किं कथयामि दैवदुर्विपाकमस्माकम् वरदक्षिणा संपूर्णतया न दत्तेति 'सुमुहूर्ते सावधानं' इति मन्त्रोच्चारणमेव मास्त्विवति ते वरबान्धवाः हठरागप्रदीपिकामेव गृहीत्वा स्थिताः सन्ति। अत एव मङ्गलवाद्यमपि तैरेव निवारितम् ।

मङ्गला - मातुल ! तर्हि अहमेव गत्वा तान् जनान् अथवा वरस्य मातरं साक्षादेव पृच्छामि वा ।

दामोदरः - नहि नहि तथा न। मङ्गले तव विवाहसमये त्वदीयाः श्वशुर-बान्धवाः सदयहृदयाः वरदक्षिणां विनैव विवाहं कृत्वा यदुक्तवन्तः तदद्यापि स्मरामि ।

हिरण्यं हि भयारण्यं द्रव्यमद्रव्यमेव च ।
हिरण्यवर्णा कन्येयमस्माकं गृहदेवता ॥ ३ ॥

श्रीधरः - परमेते तथा न सन्ति ।

दामोदरः - विवाह समये सर्वथा कलहो मास्तु ।

विवाहे कलहो नाम गौरवं धूलिधसरम् ।
गौरवस्य च नाशोऽयं मरणादतिरिच्यते ॥ ४ ॥

श्रीधरः - मातुल ! तातोऽप्यत्रैव आगतः।

केशवरायः - हा हन्त मण्डपे एव एते हठकठोरस्थिताश्चेत् किं करोम्यहं मन्दभागः। पुत्र! सर्वथा दिङ्मूढोऽस्मि। मद्विषये विधिरतीव क्रूरतरो दृश्यते।

श्रीधरः - तात! धनस्य का व्यवस्था भवेत् ?

केशवरायः - श्रीधर ! पुत्र ! किं कथयामि ?

यैः पूर्वं द्रव्यमाहात्म्यो[illegible]स्ततः प्रदर्शितः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तैरेव मम दौर्भाग्यात् रिक्तहस्तः प्रदर्शितः॥ ५ ॥

दामोदरः –तथैव अचिरादेव वरदक्षिणा दीयते, मङ्गलकार्ये अमङ्गलं माभूदिति बहुशः प्रार्थिता अपि ते वरबान्धवाः नैव श्रृण्वन्ति ।

पुरोहितः – (प्रविश्य) भोः केशवरायाः, श्रीधर ! सर्वे अत्रैव वर्तन्ते, विवाहमण्डपे न केऽपि सन्ति। अहमेकाकी पुरोहितः किं करोमि, सुमुहूर्तस्तु नातिक्रमणीयः।

श्रीधरः – पुरोहितवर्याः, सुमुहूर्तस्तु दुर्मुहूर्त इदानीं संवृत्तः। संपूर्णां वरदक्षिणां विना विवाह एव मास्तु इति ते हठयोगमाश्रिताः सन्ति वरबान्धवाः अत एव इदानीं विलम्बः।

पुरोहितः – भवतु नाम, मुहूर्तस्तु नातिक्रमणीयः। पुनश्च गत्वा तान् वरबान्धवान् विज्ञापयामः।

दामोदरः – आर्य ! कैश्चित् वक्तुं न शक्यते। अत्र अवशिष्टं तावत् तेषां पादग्रहणमेव ।

पुरोहितः – आगच्छन्तु सर्वे वधूः राधा तावदत्रैव आगच्छति सख्या सह। तस्याः समक्षं ईदृशी चर्चा माभूत् , तत्रैव मण्डपं यास्यामः। (सर्वे गच्छन्ति)

राधा – (सख्या सह प्रविश्य) सखि ! किं वरदक्षिणाहतकस्य कृते विवाहः संरुद्धो वर्तते। स च वरः तथा क्रूरवरः किम् ? अहमिदानीं किं करोमि ? शकुन्तले विवाहो नैव घटते किम् ?

शकुन्तला – मा बिभेहि। मा बिभेहि। वरदक्षिणानाम समाजस्य महान्

करोमि ? शकुन्तले विवाहो नैव घटते किम् ?

शकुन्तला – मा बिभेहि। मा बिभेहि। वरदक्षिणानाम समाजस्य महान् रोगः।

राधा – अस्य रोगस्य घोरस्य धैर्यं दिव्यौषधं सखि ।
शुष्कलज्जां परित्यज्य योद्धुमग्रे सराम्यहम् ॥ ६ ॥

सखि पीडामिमां परिहर्तुं धैर्यमवलम्ब्य प्रयतामहे। एहि मण्डपमेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
गच्छाव:। (इति गच्छत:)

(मण्डपदृश्यम् , वरस्य पित्रादय: उपविष्टा:)

दामोदर: – भो भो वरबान्धवा: भीमरायादय: अस्माकं गौरवं संरक्षयन्तु। अयं च कुलमर्यादाया: प्रश्न:। कृपया पञ्चदशदिनानामवकाशो दीयताम् ।

श्रीधर: – सर्वापि वरदक्षिणा निश्चितमेव दीयते। उग्रपति महोदया: प्रसीदन्तु भवन्त:।

भीमराय: – श्रीधर ! अस्माकमपि गौरवमस्ति। यथोक्तप्रकारेण सर्वमपि द्रव्यं भवद्भिरेव दातव्यं किल ।

उग्रपति: – अस्माकं वरस्य कन्या: न लभ्यन्त इति मन्यन्ते वा भवन्त:। न वयं भिक्षां याचयाम:। इयं तु निश्चिता, प्रतिज्ञाता वरदक्षिणा। भवन्तश्च यथोक्तं कुर्वन्ति इति मत्वा सोढं प्रतिपालितं च ।

भीमराय: – निश्चितस्य द्रव्यस्य एकमपि रूप्यकं न्यूनं चेत् वयं मण्डपं परित्यज्य गन्तुं शक्नुम:।

उग्रपति: – किं भावितं भवद्भि:, किमिदं नाटकं प्रवर्तते वा। श्रीधर ! गच्छ वरदक्षिणां विना विवाहो नैव घटते ।

केशवराय: – भीमराया: नमस्कृत्य पुन: पुन: विज्ञापयामि......।

प्रभावती – किं वा पुन: पुन: वक्तव्यम् । अस्माकं प्रातिवेशिकस्य गृहस्थस्य लघुतर उद्योग:, विवाहे विंशतिसहस्रं वरदक्षिणां गृह्णाति तस्मादपि अवर: किमस्माकं वर:।

भीमराय:– भो: भो: पश्यन्तु भवन्त:। नाधिकां वचोवैखरीं श्रोतुमिच्छाम:। धनं हस्ते विन्यस्य मङ्गलसूत्रं गृहाण, नो चेत् वयं यथागतां वरयात्रां तथैव निवर्तयाम:।

पुरोहित: – भो: भो: भीमराया: पश्यन्तु तावत् । वरदक्षिणायाश्च कृते मुहूर्तातिक्रमो मास्तु। प्रथमं मङ्गल समारम्भ: प्रवर्तताम् । अनन्तरं चर्चा भवतु ।

प्रभावती – पुरोहितवर्या: ! भवतां मध्ये पानीयं मास्तु । यदि च मुहूर्त:

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिक्रान्तश्चेत् मुहूर्तान्तराणि विद्यन्ते। इयमेका वधूः परित्यज्यते चेत् विपुलाश्च अन्याः कन्या लभ्यते। कोऽयमाग्रहः।

केशवरायः – आर्याः विशालमनोभावेन मङ्गलकार्यं निर्वर्तयन्तु, भवतां पादौ निपत्य याचयामि।

राधा – हन्त तातः मत्कृते तेषां क्षुद्राणां पादौ गृहीतुमिच्छति। नहि नहि न कदापि तथा भवेत्। (सहसा उपसृत्य) क्षुद्राः क्षुद्राः ! धनस्य पुरतः भवतां मनुष्यस्य मौल्यमेव नास्ति किं? तात एतैः विवाहो नैव इष्यते, केवलं धनं धनं धनम्।

दामोदरः – राधे राधे ! तथा नोक्तव्यम्। विवेकविहीनासि किं? नायं शालभञ्जिका विवाहः। किमियं बाललीला। (रोद्धुं इच्छति)

राधा – मुञ्च मां मुञ्च। धनतृषितैः एतैः सह संबन्धं परित्यज्य कूपपतनमेव युक्ततरम्। भो भीमरायाः वृद्धा भूत्वापि विवेको भवताम्। वरदक्षिणायाश्च कृते ईदृशो हि आशाराशिः!

शकुन्तला – एतादृशैः सह विवाहसंबन्धं विना अविवाहितत्वमेव वरमिति मन्ये। अनेनैव वरदक्षिणारोगेण इदानीं–

नष्टान्यनेकानि च जीवितानि कुलान्यसंख्यानि समाकुलानि।
कन्याश्च जन्मान्यतिवाहयन्ति विहाय संसारसुखानि बह्व्यः ॥ ६ ॥

राधा – महाजनाः पश्यन्तु ! पश्यन्तु !

इयं समस्या मम वाद्य संभवेत् श्वोभाविनी सा भवतां दुहित्रे।
धनतृषैषा हि भवेदनन्ता वधूकुलं रक्षणमर्हति ध्रुवम् ॥ ७ ॥

शकुन्तला – कस्यापि विवेक एव नास्ति किम् ?

विवेक हीना युवकाः क्रूरा च वरदक्षिणा।
वर्धमाना समस्येयं कथं परिहृता भवेत् ॥ ८ ॥

राधा – अरे विवेकशून्य वर ! मूढवर ! बहुतरं अध्ययनं कृत्वापि सुसंस्कृतंमन्यः अभियन्ता च भूत्वा कापि विचारशक्तिरपि नास्ति किम् ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रूपं गुणान् गणयसे न कथं विमूढ
धिक् त्वां च रे स्पृहयसे वरदक्षिणायै ।
कापूरुषोऽसि पदवीधर हा कथं त्वं
सौजन्यलेशमपि ते न विलोकयेऽहम् ॥ ९ ॥

स्वैरं विचारय कथमिदं युक्तं नवेति ।

श्रीनाथः – तात तात ! वधूरियं यथार्थमेव वदति। युवकाः युवत्यश्च यावता धैर्यमवलम्ब्य अग्रेसरा भूत्वा समाजसुधारणार्थं न प्रयतन्ते तावत् पर्यन्तं इयं वरदक्षिणापीडा नैव निवार्य्यते भोः भोः केशवरायाः चिन्तां मा कुरुथ। वरदक्षिणया विनैव अहमिदानीमेव राधायाः पाणिग्रहणं करोमि ।

सर्वे – साधु वर, साधुवरीयानयं वरः।

श्रीनाथः – मम मातापितरौ नेच्छन्ति चेन्मास्तु। अहमिमां राधां नैव त्यजामि।

विवाहो न धनस्यायं कलहः प्रीतिनाशकः।
मधुरो जीवनस्यायं सम्बन्धः पुरुषस्त्रियोः॥ १० ॥

पुरोहितवर्याः विवाहः प्रवर्तताम् शीघ्रम् ।

श्रीधरः – परं मुहूर्तस्तु अतिक्रान्तः कथमिदानीं विवाहमङ्गलम् ?

पुरोहितः – नहि नहि । मुहूर्तो नातिक्रान्तः। अयमेव शुभमुहूर्तः, सुमुहूर्तः।

युवकास्तु विवेकेन संत्यज्य वरदक्षिणां ।
सरन्त्यग्रे विवाहार्थं सुमुहूर्तः तदोच्यते ॥ ११ ॥

इदानीञ्चाङ्गस्य मुहूर्तो नावश्यकः।

श्रीनाथः – राधे राधे इत एहि।

अद्य प्रबोधवचसां खलु ते सरण्या
प्रक्षालिता हि धिषणा कलुषावृता मे ।
क्रीतोऽस्मि धैर्यसुजनत्वगुणादिसंपदा ।
सौख्येन मण्डपमलं कुरु मे विदग्धे ॥ १२ ॥

Funding by IKS-MoE

दामोदरः – अक्षताः दीयन्ताम् , दीयन्ताम् ।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरोहितः - सुमुहूर्ते सावधानम्-

तदेव लगनं सुदिनं तदैव
ताराबलं चन्द्रबलं तदैव
यदा युवानो वरदक्षिणां दृढं
विहाय यास्यन्ति विवाहमण्डपम् ॥ १३ ॥

सुमुहूर्ते सावधानम् । सुमुहूर्ते सावधानम् ।

✦ 'भामती' बेन्द्रेमार्गः, साधनकेरी
धारवाडम् -५८०००८,
कर्नाटकप्रदेशः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विजिगीषाविवशता

–डॉ॰ कैलाशनाथ द्विवेदी

पात्र-परिचयः

अलक्षेन्द्रः – ग्रीकशासकः, फिलिपपुत्रः मकदूनियाधिपतिश्च।
सेल्यूकसः – ग्रीकप्रधानसेनापतिः।
कोइनासः – संचारसूचनाधिकारी सेनानीः च
प्लूतार्कः – सुप्रसिद्धग्रीकलेखकः परामर्शदाता सेनानीः च।
गुल्मनायकद्वारपालप्रहरीसैनिकाश्च।

प्रथमं दृश्यम्

कालः – ३२६ ई॰ पू॰– प्रातः। **स्थानम्**–विपाशातटनिकटस्थः ग्रीकस्कन्धावारः (शिविरम्)

(सघनवन्यद्रुमैर्हरितलताकुंजपुंजैराच्छादितविपाशातटे सस्यश्यामलानि सुरम्यक्षेत्राणि, समीपे ग्रीकसैन्यशिविरम् इतस्ततः परिभ्रमन्तः प्रहरिणः सैनिकाश्च संलक्ष्यन्ते। समीपस्थात् सुन्दर–मन्दिरान्मधुरप्रार्थनाध्वनिः श्रूयते)

सृष्टिः शुभा विरचिता समयेऽद्भुतैव,
या पाल्यते प्रकृतिजैर्बहुदिव्यतत्त्वैः।
संहार्यते प्रलयकालनिभेन येन,
पायादशेषजगतीं परमेश्वरः सः॥ १ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यस्यैव चारुचरितं ह्यनुचिन्त्य चित्ते,
यस्यैव कीर्तिमतुलां विमलां च गीत्वा ।
यस्यैव नामतरणी भवसिन्धुहेतोः,
सः तारयेदखिललोकपतिर्दयालुः॥ २ ॥

येनैव श्रेष्ठरणवीरजना अजेयाः,
शत्रुं जयन्ति युधि कीर्तिनिधिं लभन्ते ।
यस्यैव दिव्यकृपया बलिनः समर्थाः
नाश्रित्य तां भुवि वयं विवशा वराकाः॥ ३ ॥

(नान्द्यन्ते ततः प्रविशन्ति सशस्त्राः सावधाना ग्रीकसैनिकाः परस्परमालपन्त :)

प्रथमः सैनिकः (प्रार्थना स्वरं श्रुत्वा द्वितीयं सैनिकं प्रति)– सखे ! सत्यं वराकाः वयं प्रभुकृपां विनाऽसमर्थाः विवशा एव स्मः।

द्वितीयः सैनिकः (शिरश्चालयन् प्रथमं सैनिकं प्रति)– वाढम् वयं त्रिवर्षेभ्यः एवमेवाऽनुभवामः। पशुवदनुशासनदण्डेन नियंत्रिताः सेनानीभिः संचालिताः सर्वथाऽसहाय एव स्मः।

तृतीयः सैनिकः (हस्तमुद्यम्य)– दिवानिशमत्र योधनम् अनवरतं गृहाद् वर्धमानोऽन्तरालः, शत्रूणां संवर्धमानतेजसः प्रभावस्य च गहनताऽस्मान् उद्वेजयति। अन्ततः युद्धस्य काऽपि सीमा भवति ।

प्रथमः सैनिकः (शिरश्चालयन्)– अस्मत्स्वामिनो महत्त्वाकांक्षायाः काचित् सीमाऽस्ति न वा ?

द्वितीयः सैनिकः (सविषादं निःश्वसन्)– वियुक्तोऽस्माकं गृहपरिवारः, वियुक्ताः सुहृद आत्मीयजनाश्च, यौद्धिकाऽभियानमार्गे मृता अनेके प्रियसहचराः। वराकास्ते स्मृतिशेषा एंव संजाताः।

Funding by IKS-MoE

तृतीयः सैनिकः (शिरःसि हस्तं स्थाप्य)– अस्माकं खाद्यापूर्तिरप्यवरुद्धा,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत एव खानपानमनियमितं संजातम् । अनेन शारीरिकशक्तिः सामर्थ्यञ्च ह्रासमुपेतम् । तीव्रचलनेन चरणा अपि स्खलिताः भवन्ति ।

प्रथमःसैनिकः(सविषादम्)-अस्माकं गणवेशवस्त्राण्यपि जीर्णशीणानि। स्वदेशादेतेषामापूर्तिरसंभवैव प्रतीयते ।

द्वितीयःसैनिकः (उत्तेजितोभूत्वा) शान्तिप्रियेऽस्मिन् दिव्यदेशेऽस्म--दभियाने हिंसामयातं कस्यलुण्ठनस्य कुकर्मकरणं निन्द्यमेव। अर्थ-लोलुपदस्यव इव रक्तपिपासुवृका इव वयं निन्दनीयाः स्मः। अस्माकं जीवनमिदं किमपि जीवनम् ? धिगस्मान् जाल्मान् ।

तृतीयःसैनिकः(मन्दस्वरेण)-ईदृशातंकस्य हिंसाया अधमकार्गमधुना त्यजाम्यहम् त्वरितमेव। विपाशाऽग्रेऽभियाने कथमपि न गमिष्यामि। भारभूतान्यस्त्रशस्त्राणीमानि शीघ्रमेव त्यक्षामि ।

प्रथमःसैनिकः (सहर्षं समर्थयन्) सत्यं वदसि। एवमेव ममाप्यवधारणाऽस्ति ।

द्वितीयः सैनिकः (हस्तमुन्नमय्य)- न केवलमियमवधारणा तवैव, सर्वेषां सहचराणाम् ।(नेपथ्ये विद्रोहिग्रीकसैनिकानां समवेतकोलाहल ध्वनिः ' अग्रेऽभियाने नैव चरिष्यामः । नैव चरिष्यामः ! मान्यस्त्रशस्त्राणि स्वदेशिनां शान्तिसुखार्थं त्यजामः। सैन्यवृत्तिमपि न स्वीकुर्मः। त्वरितमेव स्वदेशं प्रत्यागन्तुकामा वयम्' सैन्यस्कन्धावारे तीव्रतूर्यनादः शीत्करी घण्टाध्वनिश्च सैनिका-'इति श्रूयते'- नामेकत्रकरणार्थं भवति। सर्वे निष्क्रान्ताः।) पटाक्षेपः।

द्वितीयं दृश्यम्

(सुसज्जितसैन्यशिविरे सेनानीभिः परामर्शदातृभिश्च समावृतः विचार-विर्मश-निरतोऽलक्षेन्द्रः संलक्ष्यते।)

अलक्षेन्द्रः (उपवेशने उपस्थितानभिलक्ष्य) - भवन्तोऽवगताः स्युरेव,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदस्माकं सैनिका अग्रेऽभियाने विपाशापारकर्तुं पराङ्मुखाः प्रतीयन्ते। एषां मनोबले उत्साहे च ह्रासमवलोकितवन्तो भवन्तः किं न ? कारणमस्य विचारितं भवद्भिर्न वा? निःसंकोचं वस्तुस्थितिं तथ्यञ्च विचार्य निवेदयन्तु भवन्तः।

सेल्यूकसः (शिरोऽवनम्य मन्दस्वरेण)- श्रीमन् ! अग्रेऽभियानेऽस्माकं पुरतः पुरोरपि महाशक्तिशाली मगधराजो नन्दो वर्तते विशालभयंकर-विजयवाहिन्या सह। श्रूयते महाप्रतापि नन्दराजः समस्तक्षत्रियनरेशान्, निहत्य शूद्रराज्यं संस्थापितवान् । मागधवीराणां गौरवगाथा गीयते सर्वैरेव । अस्मत्सैनिकैरपि श्रुतमेवं मागधवीराणां विषये-

गंगेव गतिर्येषां गजा इव महाबलाः।
सिंहा इव प्रचाडाः ये ह्यजेया युधि मागधाः॥ ४ ॥

प्लूतार्कः (शिरश्चालयन् समर्थयन्)- सत्यमेवाऽयं निवेदयति मागधवीराणामद्भुतताम् तेषां शौर्यं, सामर्थ्यं, पौरुषञ्च पारसीकबलरव-वीरेभ्यो भिन्नम् , कन्दहारखुरासानसैनिकेभ्योऽपि भिन्नम् । श्रीमता संगल-संगरेऽनुभूतमेव यत् कठाः कीदृशाः कठिना आसन् ! यदि वितस्तासमीपे करीसंग्रामपराजितः पुरुराजः पश्चादेवाऽस्माकं सहायतां नाकरिष्यत् तत् यमसमाः भयंकराः कठाः कठिनप्रहारैरस्मानविलम्बमहनिष्यत् । सत्यं मागधवीराः कठिनतराः कठेभ्योऽपि ।

अलक्षेन्द्रः (हस्तमुन्नमय्य)-अलमलमतिविस्तरेण । सेल्यूकस, सन्दर्भेऽ--स्मिन् पुनर्विचार्य संक्षेपे वस्तुस्थितिं संसूचय ।

सेल्यूकसः (शिरोऽवनम्य)-श्रीमन् मगधराजस्य भीषणता, तस्य सेनायाः प्रबलता, विपुलता च विदितैव । तेषां विषये लोकेऽवधारणाऽस्ति-

धीराः सुवीरा व्रतिनो महान्तो, युद्धे महाकालसमाः प्रचण्डाः।
घोरा अजेया यमराजरूपास्ते मागधा धैर्यधना अलंघ्याः॥ ५ ॥

Funding by IKS-MoE

प्लूतार्कः(संकेतेऽनुमोदयन्)-राजन् ! तथ्यमेव निवेदयति महाभागोऽयम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यतः–

ईदृशा यत्र वीरा वै धीरा धर्मधुरन्धराः।
को विजेता रणेऽमीषामजेया युधि मागधाः॥ ६ ॥

अलक्षेन्द्रः (किञ्चित् उत्तेजितोभूत्वा)– यूयं कालेऽस्मिन् किं कापुरुषाः संजाताः? अस्माकमसामान्यं पूर्वविजयाभियानं किं न स्मरथ? (कोइनासमभिलक्ष्य) त्वं तूष्णीभूत्वा मूक इव किमाचरसि? कथयसि किं न त्वं यदिदं सर्वमसत्यं निराधारञ्चास्ति ?

कोइनासः (सविषादम्)–वीरवर ! अस्मिन् किञ्चिदपि विचित्रमद्भुतं नैव। संभवतः सूचनास्वासु काचिदंशतोऽसत्यता स्यात् किन्त्वासामसत्यतायां यत् सत्यस्याऽऽभासो भवति तेनाऽनागतविपुलविपत्तेरेव संकेतः प्राप्यते। बुद्धिमता परिस्थित्यनुसारं वस्तुस्थितेः संकेतः समये स्वीकर्त्तव्य एव ।

सेल्यूकसः (अञ्जलिं बद्ध्वा)– प्रभो ! मालववीराणामपि प्रत्याक्रमणस्य प्रबलसंभावना परिलक्ष्यते। अमीषां शौर्यं पौरुषञ्च प्रत्यक्षीकृतमेव। एषां वैशिष्ट्यविषये तु सर्वविदितमिदम्–

सदा स्वातंत्र्यकामा ये धर्मकर्मव्रते रताः।
महाकालसमा घोरा इमे मालवसैनिकाः॥ ७ ॥

प्लूतार्कः (शिरश्चालयन् स्वीकृत्य)– एवमेव श्रुतं मयाऽपि मालववीराणां विषये स्थानीयजना एषां विषये कथयन्ति–

स्वराष्ट्ररक्षार्थधृतं स्वदेहं गेहं च प्राणान् युधि ये त्यजन्ति।
धन्या धरायां धुरि मालवीयाः भास्वन्ति युद्धेऽविमुखा अजय्याः॥ ८ ॥

अलक्षेन्द्रः (भ्रुवौ वक्रीकृत्य उच्चस्वरेण)– भवतामभिव्यक्तिर्व्यक्ति–
–गत रूपे श्रुतं मया। किमभिमतं भवतां सामूहिकरूपे? परस्परं परामृश्य निर्भयं निवेदयन्तु भवंतः क्षणं विचार्य (क्षणिकनिस्तब्धतायाः पश्चात्)

सर्वे सेनानायकाः (समवेतस्वरेण)– श्रीमन् ! स्वसैनिकानां मनः –

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
स्थितिं मनोबलञ्चावेक्ष्य अस्माकं सुविचारितमतमस्ति यत् विपाशाग्रेऽस्मत्सैन्याभियानं स्थगितं स्यात् । शीघ्रमेव सुरक्षितं स्वदेश-प्रत्यावर्तनार्थं स्वसैन्यमादेशयन्तु श्रीमन्तः !

(अलक्षेन्द्र आसने घूर्णितशिरस्कः स्वेदक्लिन्नः प्रकम्पितो विवर्णमुखश्च लक्ष्यते। किञ्चित् कालानन्तरं क्लेशमनुभूय उत्तिष्ठन्)

अलक्षेन्द्रः (सविषादं स्खलन्निव) हताशां हित्वा पुनरेकवारं स्वाभिमते भवन्तो गम्भीरतया विचारं कुर्वन्तु। (स्वसैनिकान् प्रति) समवेता भवन्तः प्रबोधयन्तु विपाशाऽग्रेऽभियातुम् विजयार्थम् । मामेकाकिनं विहाय गच्छन्तु भवन्तः सर्वे। विनाऽस्मदनुमतिं कोऽपि ममपार्श्वे नागच्छेत् । स्वमुखमपि न दर्शयिष्यामि युष्मान् मतपरिवर्तनं विना। विश्व- विजिगीषोरलक्षेन्द्रस्य अभियानादपसरणेऽकीर्तिकलुषितं मुखं कोऽत्र द्रक्ष्यति ? (सर्वे आसनेभ्यः उत्तिष्ठन्ति। उपवेशनस्थलात् निर्गच्छन्ति पटाक्षेपः।)

तृतीयं दृश्यम्

(हरितदूर्वादलयुक्तं सुरम्यं शिविरसैन्याभ्यासस्थलं, सेनाधिकारिणः, समूलबद्धाः सैनिकाश्च संलक्ष्यन्ते परस्परमालपन्तः यत्र-यत्र)

प्रथमः सैनिकः (सहर्षम्)- ज्ञायते राज्ञाऽलक्षेन्द्रेण सेनानीभिः सह विचार- विमर्शोऽग्रेऽमियान विषये कृतः। आकुला वयं निर्णयं ज्ञातुम् ।

द्वितीयः सैनिकः (अनुमोदयन्)- एवमेव मयाऽपि श्रुतमस्ति। किं नु वक्ष्यति विषयेऽस्मिन् अस्मत् प्रधानसेनापतिः सेल्यूकसः?

तृतीयः सैनिकः (उत्तेजितो भूत्वा तीव्रस्वरेण)- कथयेत् किमपि सः। वयमितो विपाशाग्रे पदमेकं न गमिष्यामः- इत्यस्माकमपि निर्णयोऽस्ति। सैनिकेभ्यः सैन्याधिकारिणः समर्थतराः नैव भवन्ति। कदा पर्यन्तं वयमनुशासनपाशे निबद्धा दण्डेन नियंत्रिताः पशुसमा जीवेम? स्वच्छन्दाः

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पक्षिणोऽपि मानवात् गरीयांसः।

(किञ्चित् कोलाहलं भवति। गुल्मनायकस्य शीत्करीध्वनिः श्रूयते पंक्तिबद्ध भवितुम् । सैनिका वि श्रृखलिता इव पंक्तिबद्धा भवन्ति। प्रधानसेनापतिः सैनिकान् सम्बोधनार्थमागच्छत्यग्रे उच्चस्थाने)

सेल्यूकसः (हस्तुमुन्नम्य सम्बोधयति सैन्याधिकारिणः सैनिकांश्च)-प्रिय युवसहचराः ! सावधानतया श्रृण्वन्तु स्वामिनोऽलक्षेन्द्रस्य निर्देशम् । यथा शीघ्रं वयं विपाशां तीर्त्वा पूर्वे मगधमगधान् प्रत्यभियास्यामः। यदि कस्यचित् काचित् शंकाऽस्मिन् विषये भवेत् , हस्तमुन्नम्य कथयतु माम् ।

प्रथमः सैनिकः (हस्तमुन्नम्य)-महोदय, त्रिवर्षेभ्यो युद्धरताः वयं विपन्नाः, परिश्रान्ताः, स्वपरिवारेभ्यो नियुक्ता विपाशापारं न कृत्वा स्वदेशं प्रत्यावर्तुकामा प्रबलभारतीयानां मागधानां वा विषये भवन्तो न जानन्ति किम्-

स्वाभिमानधना धीरा वीरा धर्मधुरन्धराः।
इमे यमसमा भीमा अजेया युधि मागधाः॥ ८ ॥

द्वितीयः सैनिकः(समर्थयन्) श्रीमन् ! इतोऽग्रेसरणं विपत्तीनामामंत्रणमेव। मातगधहिंस्रसिंहानां समक्षमाखुरिवाऽस्माकं दुर्गतिरेव भविताऽनायास प्राप्तौ सति ।

तृतीयः सैनिकः (शिरः उन्नम्य)- वयमातंकहिंस्रकार्येभ्यो विमुखं भूत्वाऽवशेषजीवने शान्त्या सद्धर्मकर्माणि कर्तुमिच्छामः। दस्यव इवाक्रम्य नगरेषु निर्दोषान् नागरिकान् निहत्य धनं हृत्वा लुण्ठका इव पलायनमधुना नैव कर्तुकामा वयम् ।

प्लूतार्कः (सैनिकान् नियंत्रितं कृत्वा)- शान्त्या श्रृण्वन्तु सेनापति-संसूचितलक्षेन्द्रस्य निर्देशम् । युष्माकं योगक्षेमार्थमहर्निशं वयमपि चिन्ताकुलाः स्मः। (सैनिकाः तुमुलं कोलाहलं कुर्वन्ति। सेनापति-रलक्षेन्द्रस्य सूचना परामर्शदाता कोइनासोऽग्रेसृत्य सैनिकान् सान्त्वयन् गम्भीरस्वरेण सम्बोधयति)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोइनासः (हस्तमुत्थाप्य)– गौरवशालिग्रीकसेनायाः श्रेष्ठसैनिकाः शूरवीरवराः । भवतां भावनाः विचारा अवगता अस्माभिरधुना। धैर्येण सैन्यानुशासनं मर्यादां संरक्ष्य शान्त्यैव प्रतीक्षन्तु भवन्तोऽत्र किञ्चित्कालम्। भवद्विचारान् निवेदयिष्यामो वयमलेक्षेन्द्रं महाबलम् । संभवतः सः शीघ्रमेव वस्तुस्थितिमवगत्य स्वनिर्णये पुनर्विचारं कुर्यात् ।

सेल्यूकसः (तारस्वरेण सैनिकान् प्रति)–सर्वे भवन्तः शिविरप्रकोष्ठं गत्वा शान्त्या विश्रामं कुर्वन्तु। प्रतीक्षन्तु अग्रिमनिर्देशं प्रातः अस्मिन्नेव स्थलेऽलक्षेन्द्रः सम्बोधयिष्यति। वयं शीघ्रमेव एनं मिलित्वा कथयिष्या-मस्तवाभीष्टम् । गच्छन्तु सर्वे यथास्थानं शिविरम् । (गुल्मनायकं संकेतयति। शीत्करीध्वनिर्भवति। निर्देशानुसारं निखिलाः पंक्तिबद्धाः सैनिकाः निर्गच्छन्ति। पटाक्षेपः ।)

चतुर्थं दृश्यम्

(सुरम्यशिविरस्थलसमीपात् विपाशातटवर्तिमन्दिरनिकटात् नद्यां स्नपयतः सुन्दरयुवकस्य मधुरं गीतध्वनिः श्रूयते)

विपाशा विचित्रा विचित्रप्रवाहा,
सचित्रेव भूमिर्ययैवाऽतिरम्या ।
मनोहारिणीयं महावेगशीला,
सुवामेव काम्यान्वियं पाशभूता ॥ १० ॥

लताकुंजपुंजैश्च कूलाभिरामा,
सुरामेव रम्याऽविरामा सरागा ।
हसन्ती लसन्ती लुठन्ती लपन्ती,
वहन्ती विपाशा नवा पाशभूता ॥ ११ ॥

खगैर्या मृगैर्वन्यजीवैरनेकैः
पिपासाकुलैर्बालवृद्धैरसंख्यैः।
रसान्वेषकैः प्राणिभिः प्रार्थितेव
विपाशैव ह्याकांक्षिता स्वप्रियेव ॥ १२ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न पारं प्रयातुं वयं शक्नुमो वै विपाशा
नु जाता नवा पाशरूपा ॥ १३ ॥
समृद्धिं प्रदात्री शुभाभूतधात्री पुराणीह
भूत्वा नवीनेव काम्या ।
इयं मानसे भावरूपे वसन्ती,
विपाशा विचित्रा न वा पाशरूपा ॥ १४ ॥

अलक्षेन्द्रः(मन्दस्वरेण)-सत्यमियमति शोभना सुन्दरीव विपाशा पाशभूतेव जाताऽस्मत्सैनिकानां सैन्याधिकारिणाम् । अस्य सुन्दरगीतस्य मधुरपदानि सर्वथा सार्थकान्येव सन्ति। सैन्याधिकारिभिः सैनिकानां मनोदशा परिवर्तिता न वा? ते मया मिलितुं निवारिता, किन्तु का गतिस्तेषां दर्शनं विना ? (घण्टिकाध्वनिं कृत्वा, द्वारपालं प्रति) सेनापतिं शीघ्रमत्राऽनय ।

(किञ्चित्कालानन्तरं सावधानः सेल्यूकसः प्रविशति)

सेल्यूकसः (प्रणम्याञ्जलिं बद्ध्वा)-स्वामिन् अभिवादयेऽहं सादरम् । काऽऽज्ञा भवताम्?

अलक्षेन्द्रः(सोत्सुकम्)-सम्प्रति सैनिकानां का मनोदशा? भवद्भिस्तेषां मनोबलं वर्धापितं न वा? अग्रेऽभियानार्थमेषामान्तरिक-प्रवृत्तिः परिलक्षिता न वा?

सेल्यूकसः (शिरोऽवनम्य, सविषादम्)-प्रभो ! परिवर्तिता प्रवृत्तिरमीषां नैव। विपाशापारे सर्तुमिमे सर्वे सहमता नाभवन् । भवतां निर्देशमपि नैव शृण्वन्त्यमी। अतिगम्भीरा सैन्यस्थितिः साम्प्रतं वर्तते ।

अलक्षेन्द्रः(निष्प्रभ इव)- स्वसैनिकान् सम्बोधयितुकामोऽहमविलम्बमेव। शीघ्रं गत्वा शिविरसैन्याभ्यासस्थले सर्वान् सैनिकान् अधिकारिणश्च आकारय। दृष्टुकामोऽहमेतान् शीघ्रमेव ।

सेल्यूकसः (अभिवादयन्) यथाऽऽज्ञा श्रीमताम् । (निष्क्रान्तः)

पटाक्षेपः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चमं दृश्यम्

(विपाशातटवर्ति सुरम्ये शिविरसैन्याभ्यासस्थले सैन्याधिकारिणः सैनिकाञ्च सम्बोधयन् अलक्षेन्द्रः। सर्वे सावधानमुद्रायामेनं शृण्वन्ति)

अलक्षेन्द्रः (हस्तमुन्नम्य) प्रियबन्धवः! ग्रीकगौरवाः!! यूनानतो वयं पारसीक-बलख-कन्दहार-खुरासान-प्रभृतिराज्यान् पददलितं कृत्वा स्वविश्वविजयाभियाने विजयपताकां नीत्वा विपाशातटं प्राप्ताः स्मः। अग्रेऽनुसृत्य मगधराज्यं जेतुमस्मल्लक्ष्यमस्ति। एतदर्थं भवद्भिस्त-त्परैभार्वव्यम् । (पश्चतः सैनिकानां तुमुलं कोलाहलं श्रूयते।)

सेल्यूकसः (सैनिकान् नियंत्र्य) शृण्वन्तु स्वामिनः सम्बोधनमनुशासनेन ।

अलक्षेन्द्रः (साक्रोशम्) भवन्तो भयभीन्ताः कापुरुषा इव मागधेभ्यो विभ्यति। किममकीर्तिकलंकपंकालेपने प्रवृत्ताः सन्ति भवन्तः?अलक्षेन्द्रस्य खड्गकौशले बाहुबले च भवतां विश्वासो न वर्तते किम्? ग्रीकवीराणां गौरवं विस्मृतं किम्? विजयाभियानं मध्ये एव विसृज्य भवत्सु कापुरुषवत् पराङ्मुखे भारतीयजना हसिष्यन्ति। (सेनायां पुनः कोलाहलं भवति)

अलक्षेन्द्रः (उत्तेजितो भूत्वा सक्रोधम्) विसृजन्तु मामेकाकिनमेव मागध-शत्रु-सेनायां प्रवेष्टुम् । नदीनां तीव्रधाराः संतर्तुं, मदमत्तगजानां क्रोधलक्ष्यं भवितुमेकाकिनं माम् परित्यजन्तु। येषां नाम्नैव भवन्तो भयभीतास्तेषा-माखेटाय घातलक्ष्याय मामेकाकिनं त्यक्त्वा सर्वे सुखेन स्वगृहपरिवारं प्रत्यावर्तन्तु। (सर्वे चित्रलिखिताः, निर्विकारा, अप्रभाविता इव लक्ष्यन्ते) अविचलिता भवन्तोऽस्यां स्थितौ। प्रतीयते, स्वामिनः प्राणसंकटापेक्षया स्वप्राणसंकटस्यैवाऽधिका चिन्ता भवत्सु वर्तते। भवद्भिः कापुरुषै-र्वियुक्ते सत्यन्यवीराननुचरानग्रेऽन्वेषयिष्याम्यभियाने। (विषादेन विवशो भूत्वा स्वस्वेदमपनयन् ललाटात् , तीव्रस्वरेण पुनः सैनिकानभिलक्ष्य) किं मम शब्दध्वनिर्बधिरकर्णेषु स्थाणुपिण्डेषु प्रस्तरेषु च पतति? तान् पाषाणहृदयान् प्रबोधयामि, उच्चैराकारयाम्यहं तान् , ये विद्रोहिणः संजाताः। ये शत्रुभयेन पूर्वमेव मर्दिताः सन्ति। गच्छन्तु, प्रत्यावर्तन्तु स्वदेशं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रति परन्तु स्मरन्तु भवन्तः-स्वपृष्ठादपयशोमसिं प्रक्षालयितुमक्षमा भविष्यन्ति, भूमध्यसागरस्य सर्वमेव सलिलमपि कलंकपंकमिदं प्रक्षालयितुं न प्रभविषयति ! (अलक्षेन्द्रस्य अन्तिमः प्रयासोऽपि विफलो जातः। विश्वविजिगीषोर्विवशताऽश्रुभिरेवं प्रकटिता यत् स्वसेनां स्वदेशं गन्तुमादिष्टवान् निराशया तथा विपाशाया निर्मलजले स्वविवर्णं कलंकितमिव मुखं प्रक्षालयितुमेकाकी एव निर्गतः। शोकसंतप्तस्य तस्याश्रुधारा विपाशाधारया मिलित्वा शोकसिन्धौ निमज्जयन्तीव तम् । तटवर्ति-मन्दिर- साधूनामिमां प्रार्थनाध्वनिं श्रावयन्ती शीतलमिवाऽकरोत् । प्रार्थनाध्वनि- सार्धमलक्षेन्द्रोऽपि प्रसन्नतयोक्तवानेवम्-(भरतवाक्यम्)

न कोऽपि कस्यचित् राष्ट्रे आक्रान्ता वै भवेद् भुवि ।
सर्वे सुखेन शान्त्यैव निरातंका नराश्च स्युः॥ १५ ॥
हिंसातंकविद्वेषञ्च हित्वा प्रेम्णा वसन्विह ।
विश्वशान्तिं शुभां लब्ध्वा मानवता विभासयेत् ॥ १६ ॥
सुखशान्तिसमृद्ध्यैव निरातंकितभारताः।
विश्वं विभूषयेयुर्वै सत्कर्मगुणभूषिताः॥ १७ ॥

(नेपथ्ये केलिक्रीडाऽऽमोदप्रमोदसंगीतमयनृत्यगाननिरतानां मदिरापानेन मदमत्तग्रीकसैनिकानां संगीतध्वनिः श्रूयते। प्रसन्नसैनिकानां महाविरावेऽस्य विश्वविजिगीषोर्विवशता प्रार्थनाध्वनिश्च विलीने- वाऽभवत् , किन्तु यदा कदाऽन्तराले विपाशाजलस्य लोललहर्यस्तटं तीव्रतया पीडयित्वा शब्दायमाना आसन् ।) पटाक्षेपः।

✦ शास्त्रीनगरम् , अजीतमल (औरैया) उ० प्र०
पिनसंख्या-२०६१२१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुरुदक्षिणम्

-आचार्य रामकिशोर मिश्रः,

[स्थलम्- एकलव्यस्यकुटीरः। स आचार्यद्रोणस्य मृण्मयमूर्ति-समक्षमुपासनाय हृदि मनसा गुरुं ध्यायन् भूस्थापिताऽष्ठीवदा सनस्थः सादरं पुष्पाणि भूमावेव स्थापयन् प्रार्थयते।]

एकलव्यः- देहि विद्यावरं गुरुवर !

ममाऽभ्यासो भवेत्सफलो नाददत्कञ्चिदवरोधम् ।
सर्वदा विजयै रिपून् स्वान्, ददिमं तव धनुर्बोधम् ॥
द्रवेः शूद्रे मयि द्विजवर ! देहि शरविद्यां हि गुरुवर ! ॥ १ ॥

व्रजेयं कर्तव्यमार्गं जीवने तन्नो त्यजेयम् ।
पतेयं बाधासु नित्यं परं तस्मान्न विरमेयम् ॥
निर्वहेः शूद्रान् सुधीश्वर ! देहि विद्यावरं गुरुवर ! ॥ २ ॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा प्रजा राजः।
स्वदेशीया विदेशीयाः सन्ति सर्वे तुल्यभाजः॥
पुनस्ते ज्ञानं क्व बुधवर ! देहि विद्यावरं गुरुवर ! ॥ ३ ॥

वयं सर्वे मनोः पुत्रास्ततः कोऽयं जातिभेदः?
कृतं मध्ये तं विहातुं नाऽद्य सज्जोऽसीति खेदः॥

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऐक्यमधुना शिक्षयेः नर ! देहि शरविद्यां हि गुरुवर ! ॥ ४ ॥

विहेयास्ते दुर्विचाराः, सर्वथा शिक्षितो विश्वः।

अन्यथा देशस्य रक्षा दुष्करा स्यात्सर्वतः श्वः॥

तदात्माऽयं समो द्विजवर ! देहि विद्यावरं गुरुवर ! ॥ ५ ॥

[अतः परं धनुर्गृहीत्वा तदभ्यासायोत्तिष्ठति। पाण्डुपुत्रैः सह समक्षमायान्तमाचार्यद्रोणमवलोक्य, स्वगतम्] अहो! गुरुदेव इत एवाऽभिवर्तते। धन्यं मे भाग्यम् । [अग्रे द्वित्राणि पदानि गत्वा सहर्षं प्रणम्य, प्रकाशम्] आगम्यताम् , आगम्यतां गुरुदेव! पूयतां स्वपादपद्मार्चनया पाण्डुपुत्रैः सह दीनस्याऽस्य शिष्यस्याऽयं कुटीरः, सनाथीक्रियतां चाऽस्य स्वान्तः।

द्रोणः- (हस्तमुद्यम्य) स्वस्ति ते वत्स!

एकलव्यः - (आसनं विस्तीर्य, बद्धाञ्जलिः सम्मुखमवस्थित्य सनम्रभावम्) कथङ्कारं समभूवन् गुरुचरणाः सानुकम्पाः सेवकमेनमद्य शूद्रमपि शोधयितुम्? कथ्यतां कृपया गुरुदेव !

द्रोणः- (सस्मितम्) एषु पाण्डुपुत्रेषु मे प्रियशिष्येषु पटुशिष्येणाऽर्जुनेन सपरिचयं त्वदीयं धनुर्विधाकौशल-सम्बन्धिवृत्तमशेषमश्रावि। तदेव कारणमभूदत्राऽऽगमनस्य मे प्रियशिष्य ! ते सुदर्शनाय ।

एकलव्यः- (प्रसन्नमनाः, स्वागतम्) अहो भाग्यं मे! सफला मम विद्या ! यद् गुरुणेत्थं प्रशस्यते। जीवनमपि धन्यम् , यदुच्चवर्गपक्षपातिना द्रोणेनाऽद्य शूद्रस्यापि शिष्यत्वं स्वीकारितम्। मया किन्न कर्तुं शक्यते संलग्नचित्तेन पुरुषेण? (प्रकाशम्) अनुगृहीतोऽस्मि बहु। अद्य मे प्रफुल्लचेतो भवतां दर्शनेन ।

द्रोणः- वरं वत्स! वरम् । अथ तव धनुर्नैपुण्यं द्रष्टुकामा वयम् ।

एकलव्यः- (सहर्षम्) दृश्यतां गुरुदेव! कृतार्थोऽस्मि। (शराभ्यास-कौशलं दर्शयति) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रोणः- (बाणक्षेपचातुर्यमवलोक्य) प्रष्टव्योऽसि वत्स !

एकलव्यः- (सविनयम्) आज्ञाप्यतां गुरुदेव ! पश्यामि, दासोऽयं कां सेवां प्रस्तौतु?

द्रोणः- (सोत्कण्ठम्) कस्त्वामशिक्षद् धनुर्विद्यामिमाम्? सत्यं कथय सत्यम् ।

एकलव्यः- (सहर्षम्) भवानेव गुरुदेव ! धनुर्विद्याशिक्षकः।

द्रोणः- (साश्चर्यम्) अहम्?

एकलव्यः- (विनम्रम्) आम् , गुरुदेव ! भवानेव ।

द्रोणः- (साश्चर्यम्) तत्कथम्? नाद्यावधि मया कोऽपि शूद्रः शिक्षितोऽभूत् किमुत त्वम्?

एकलव्यः- (सहर्षस्मितम्) यदाऽहं गुरुदेव ! धनुर्विद्यां ग्रहीतुं सर्वतः प्रसिद्धानां भवच्चरणारविन्दानां गन्धच्छायामाश्रयितुमगच्छम् , तदा "शूद्रोऽसि त्वम् , नासि संस्पृश्यो नः, शूद्राणामप्रवेशोऽस्मिन् रणविद्या-पीठे" इति कथयद्भिस्तत्र श्रीमद्भिर्निषिद्धप्रवेशेन मया तच्चिन्ताकुलेन परावर्तनकाले ततः कान्तारपथे हि दृष्ट्यां समागतेन महर्षिणा ब्रह्मपुत्रेण नारदेन "अभ्यास एव गुरुः" इति समुपदिष्टेन भवन्तमेव गुरुं मन्यमानेन सादरं स्वहृदये प्रतिष्ठापितभवन्मूर्तिना निष्पादितेऽस्मिन् शराभ्यासे यत्किञ्चिदत्र साफल्यं समासादितम् , तत्सर्वं भवदनुकम्पाया एव फलमिति स्वीकुर्वाणाः सर्वथा मां स्वशिष्यमेव हृदाऽङ्गीकुर्वन्तः "शिक्षितोऽयं मयैकलव्य-नामा शूद्रोऽपि कश्चित्" इति मन्यन्तामवश्यमेवात्र भवन्तो गुरुचरणाः।

द्रोणः- (सस्मितम्) तर्हि गुरुदक्षिणाऽपि प्रदेया त्वया ।

एकलव्यः- (सश्रद्धम्) अवश्यं गुरुदेव! तद्दानमन्तरेण तु शिष्यस्य विद्या सफलाऽपि न भवेत् । आज्ञाप्यतां किमादातुमीहन्ते भवन्तस्तद्रूपेण? कृतज्ञोऽस्मि, किमीदृशं तद् वस्तु यदर्पयितुं गुरु-चरणयोर्नार्हामि देव !

Funding by IKS-MoE

द्रोणः- (स्वगतम्) धन्योऽयं भिल्लजातः। गुरुश्रद्धापूर्णमस्य हृदयम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सद्‌गुणोनो न कस्यापि वंशविशेषस्य जातेर्वा पैतृकधनम् । यादृशं यस्य कर्म, तादृशा एव तस्य गुणाः। पुरुषः शूद्रो भवेदुच्चकुलसूतो वा, गुणास्तत्र भवन्ति मुख्याः। जन्मनाऽयं शूद्रजातः, परं गुणैरुच्चकुलोद्भूत इव। तादृशा वै सर्वे सद् गुणाः सन्त्यस्मिन् समाहिताः, यादृशा एकस्मिन्नुच्चकुलप्रसूते भाव्याः। अतो हि जन्मना जातिविशेषो न मन्तव्यो बुधैः। संदृश्यस्तु सद्गुणविहीनोऽपि श्रेष्ठो मन्यते, किन्तु सद्गुणोपेतोऽपि शूद्रो न कदापि श्रेष्ठः कथ्यते। शूद्रस्तु दूरतोऽपसार्यः, सर्वथाऽपस्पर्श एव मन्यते-इत्ययं को न्यायः ? (सनिर्वेदं विचिन्त्य) किन्तुं.........न कोऽपि यथाविधि प्रचलति। यद् यस्मै रोचते, स तत्करोति। (सान्तर्विषादम्) अहो ! परवशस्थितिवशाद- द्याऽहमपि, येन स्वगुरुर्मन्ये, तज्जीवनस्य नाशहेतुर्भवामि। हा ! परिस्थिति- दास !! पुरुष !!! त्वां धिक् सर्वथा । किं वेयं विचित्रा गतिरीश्वरस्य? भवितव्यं भवत्येव। तत्पुनः किं कुर्याम्? करणीयमपि तदेव, यन्निश्चितं पूर्वमेव दैवेन। हा ! हन्त ! धिङ्माम् । (वक्षसि प्रस्तरं निधाय) अस्तु ! (प्रकाशम्) प्रदीयतां वत्स ! स्वकीयोऽयं दक्षिणोऽङ्गुष्ठः। (सनिः श्वासमधोमुखीभूय भिक्षुरिव हस्तं प्रसारयति।)

एकलव्यः- (सहर्षम्) अलमलं गुरुदेव ! दासस्त्वयं स्वमस्तकमपि बलितया दातुमलं भवतां श्रेयसे, किमनेनाऽङ्गुष्ठेन? गृह्यतां तावदयम् । (दक्षिणकरस्याऽङ्गुष्ठं लवित्रेण कर्तयित्वा तद्धस्ते समर्पयति।)

नेपथ्ये

["गुरुभक्तोऽयं विजयतेतरां नितराम् , गुरुभक्तोऽयं विजयतेतरां नितराम्" इत्थं भवति जयघोषः। तं निशम्य गुरुद्रोणः पाण्डुपुत्राश्च सर्वे विस्मिता भवन्ति।]

युधिष्ठिरः- (स्वगतम्) धन्योऽयं धन्यः। सत्येयं गुरुश्रद्धा। अनन्या च गुरुभक्तिः। यत्कार्यसम्पादनाय धनुर्विद्याभ्यासमकार्षीदयम् , स सर्वो वैफल्यं गतः। परमस्य गुरुभक्तिगतमिदं यशस्तावज्जगत्यामवतिष्ठेत,

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यावत्सूर्यचन्द्रमसावुदियाताम् । अहो! गतिचक्रम् , न जाने, किंविधोऽनर्थोऽनुदिनं सम्पद्यते ।

अर्जुनः- (स्वगतम्) अपारमेव मयि गुरोः प्रेम। यदभीष्टं मे तदेव सम्भूतमिति गुरुकर्मणः साक्षात्प्रमाणम् । किन्त्वस्मात्सम्भूतकार्यात्तस्य जीवने न जाने कियतीनां विषमस्थितीनां साम्मुख्यं भवेत्? सर्वथा स वैफल्यमेवाऽऽप्नुयाद् धनुष्प्रयोगाऽवरोधादिति निश्चितं किम्? तदस्तु, परमनया चिन्तया मे किं प्रयोजनम्? भवितव्यमभूदेव । "स्वकार्यं साधयेद् धीमान्" इत्यत्र मे दृढतरो विश्वासः। तत्सर्वमनुपयुक्तमिति नोत्प्रेक्षे । (ईर्ष्यागतं हर्षं प्रकाशयति) ।

द्रोणः- (तत्कराद् रक्तश्रावं विलोक्य सनिर्वेदं मनसि) अहो ! कोऽनर्थोऽकारि मयाऽयम्? किञ्चिदपि न विचारितम् । किं स्वाच्छन्द्यमेवाऽऽचरितम् । किमस्मै दुष्कर्मणे समभून्मे जन्म? वर्षाभेदस्त्वनुचित एव कल्पितः। हा ममोच्चकुलपक्षपात ! यत्किञ्चित्कारितं त्वया, तत्फलं सर्वमहं भोक्ष्येऽवश्यम् । परमेशदृष्ट्या सर्वे समानभाजः, तत्र न कोऽप्युच्चो नीचो वा, कृतापराधः सर्वथा दण्ड्य एव। कर्मणाऽयं सर्वथा सत्कुलोत्पन्न इव संस्पृश्यो मे शिष्येषु मुख्यः। अत्राऽहमविचारितमिव तद्वैपरीत्यमितं किमित्थमकार्षं हा! धिङ् मां धिङ् मां जातिभेदगतसङ्कीर्ण विचारकं ब्राह्मणाधमम् । (प्रकाशम्) वत्स! नासि त्वं शूद्रः, शूद्रास्तु ते सन्ति, येषां दुर्विचाराः स्युः। त्वन्त्वार्यकुलसम्भूतोऽसि। आगच्छ मामङ्क! एतद् दुर्गतं हृदयमाश्लिष्य पुनीहि मे मानसम् । (सवाष्पनेत्रो गद्गदहृदयस्त वक्षसाऽऽलिङ्गति) ।

एकलव्यः- (सहर्षम्) चिन्तयाऽलं गुरुदेव ! यद्भुतं तच्छुभम् ।

द्रोणः- (सवाष्पनेत्रम्) वत्स! भवतु ते कल्याणम् । विश्वस्मिंल्लोकस्थितिपर्यन्तं भवेत्ते सर्वतः सम्मानः। शिष्येषु त्वं प्रियशिष्यत्वेन परिगणितः सन्ननुपमं यशः प्राप्नुहीति मम शुभाशीः। (इति गम्भीर-मुखः पाण्डुपुत्रैः सह ततः प्रतिष्ठते) । Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एकलव्यः– (सहर्षम्) अनुकम्पितोऽस्मि। गुरुदेव ! प्रणामः।

(जवनिका पतति।) सर्वे निष्क्रान्ताः।

नेपथ्यादन्ते श्रूयते भरतवाक्यमेतत्–

शिष्याः स्युरेवं गुरुभक्तिलीनाः,
निजं न गुरुभिः स्थानं विहीयताम् ।
सर्वत्र पूजा स्यात् सद्गुणानाम् ,
सरस्वती श्रुतिमहती महीयताम् ॥ ६ ॥

इति गुरुदक्षिणं नाम लघुनाटकं समाप्तम् ।

✦ २९५/१४ पट्टीरामपुरम् खेकड़ा
बागपतम् ,उत्तरप्रदेशः २०११०१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिज्ञानम्

-डॉ॰ अशोक कुमार डबरालः

पत्राणि

सूत्रधारः

नटी

जबाला– धोषस्य प्रौढाङ्गना, कुट्टिहारिका सत्यकामस्य माता च ।

सत्यकामः – जबालायाः कौमारिकेयः सत्पुत्रः ।

पितामही – प्रतिवेशिनी वृद्धा, सर्वेषां पितामही

सुनन्दा – जबालायाः सुहृदया अन्तरतमा प्रतिवेशिनी सखी ।

हारितद्रुमगौतमः – बह्मर्षिः कुलपतिः सत्यकामस्य आचार्यः ।

प्रथमदृश्यम्

(नान्द्यन्ते प्रविशति सूत्रधारः)

सूत्रधारः–(दृष्ट्वा सानन्दम्) अहो ! अस्मिन् टी. वी. युगेऽपि नाटकदर्शकाणां नास्ति अभावः।

ईदृशी अपूर्वा उपस्थितिः सर्वथा प्रशंसनीया आर्ये !

नटी – आर्य ! इयमस्मि।

सूत्रधारः – आर्ये अपि पश्यसि भवती? अद्य कवि-अशोक कुमारेण विरचिते अस्मिन् प्रतिज्ञाननाटकप्रयोगे सामाजिकानां स्नेहव्यक्तिः।

नटी – आर्य! प्रत्यक्षे किं प्रमाणम्। स्यन्दते मनः। स्पर्शनी, स्पर्धिनी रचना इयम् ।

सूत्रधारः – (स्मयमानः) एवं मा वद। प्रयोगं विना तु विकत्थनं भविष्यति ते कथनम् । नाटकप्रयोगं दृष्ट्वा दर्शकाणां वाह वाह इति शब्देन प्रमाणितं भविष्यति प्रतिज्ञान-वैशिष्ट्यम् । कथय सर्वं सज्जितम् ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नटी–सुसज्जिता जबाला नेपथ्यतः आगच्छति अत्रैव ।

(गायति)

पश्य, पश्य, जबालां तां, लालितां कुट्टिहारिकाम् ।
सत्यकामो यया पुत्रः गोत्र-हीनोऽपि मार्जितः।

सूत्रधारः–अन्यच्च

अज्ञातपितृगोत्रोऽपि, सत्यकामोऽभवत्यया।
सुशिक्षया जगत्पूज्यः सा शिक्षा भातु भारते ॥

इति प्रवेशकः

स्थानम्– घोषः । तत्र एकं जीर्णं गृहम् । गृहात् बहिः विस्तृतं चत्वरम्। चत्वरे छायातरुः निंबः।

कालः– प्रातःकालः। (घोषप्रौढ़ा जबाला समार्जनीहस्ता चत्वरसम्मार्जनेन सह गायति)

जबाला– भजगोविन्दं भजगोविन्दं, गोविन्दं भज मूढमते। (तदैव प्रविशति प्रतिवेश्मनी जाङ्गली जरती लगुडहस्ता पलिक्नी कुब्जा घोषवृद्धा पितामही इति नाम्ना रूढा। (जबाला आसनं ददाति।

पितामही– जबाले! अद्य तु विशेषेण कार्येण आगताऽस्मि ।

जबाला– (सम्मार्जनीं भूमौ निधाय) अहोभाग्यमेतद् । कथ्यतां पितामहि!

पितामही–तव पुत्रः सत्यकामः चतुर्दशवर्षीयः संजातः। युवकोऽस्ति, तथापि त्वं निश्चिन्ता!

जबाला– निश्चिन्ता कथम् ?

पितामही– किमर्थं, सत्यकामस्य विवाहं न करोषि? न जानासि अयं विवाहयोग्यः संजातः।

जबाला– विवाहयोग्यः? बालस्य विवाहः ?

पितामही– अयं अद्यापि बालः? माता पुत्रं सदा बालं एव कथयति।

जबाला– किन्तु सत्यकामः ....

पितामही– मम विवाहस्तु पञ्चमवर्षे एव अभवत् ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जबाला– पञ्चमे एव वर्षे ?

पितामही– आम्। तव पितामहः च आसीत् विवाहदिने सप्तवर्षीयः। सत्यकामस्तु संजातः चतुर्दशवर्षीयः। तथापि बालः?

जबाला– किन्तु अयं...... (इति अर्धोक्ते)

पितामही– जानामि। किन्तु अयं गोत्रहीनः इति न। कोऽपि गोत्रहीनाय स्वकन्यां दातुं न इच्छति।

जबाला– सत्यकामः शिक्षाग्रहणाय गुरुकुलं गन्तुं समुत्सुकः इति ।

पितामही– तत्तु विवाहं कृत्वा अपि भविष्यति ।

जबाला– पुनः बालविवाह नोचितः । पितामहि ! बालविवाहकारणात् एव भवती बाल-विधवा जाता । अशिक्षाकारणाद् च गौशतिकस्य गृहे दासी भूत्वा एकाकी एव जीवनं यापितम् । माम् पश्य । अहमपि कुट्टहारिका इति कारणाद् विकर्मस्थैः विकारिता ।

पितामही– जबाले ! सत्यं वदसि । किन्तु ततदपि सत्यं यद् तव विवाहो यदि समये अभविष्यत् तदा विकारिता न अभविष्यत् ।

जबाला– तथापि बालस्य शिक्षणं तु अनिवार्यम् । शिक्षां बिना सर्वं शून्यम् ।

पितामही–(कटिं हस्ताभ्यां अवलम्ब्य कासते) उन्मत्तिके! पुत्रं गुरुकुलं संप्रेष्य एकाकिनी अस्मिन् गृहे कथं दिवसान् यापयिष्यसि, एकां हंसिकां आनय या अस्मिन् तव चत्वरे चरिष्यति। तव गृहं वासितं भविष्यति।

जबाला– (प्रस्तावं श्रुत्वा किञ्चिद् लोभाकृष्टा, मोहग्रस्ता) एतद् तु....

पितामही– एतद् अपि सत्यं भविष्यति। श्रृणु मम भ्रातुः कन्यालेखायाः कन्या, मृगनयनी अस्ति। तामानय सत्यकामार्थम् ।

जबाला– अस्मै गोत्रहीनाय?

पितामही– मूढे ! दास्यति अस्मै । अहं प्रयतिष्ये।

जबाला– सा प्रस्तावं स्वीकरिष्यति?

Funding by IKS-MoE

पितामही– करिष्यति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जबाला- (उत्कण्ठापूर्वकम्) कथम्?

पितामही - अत्र गोत्रविकार:, तत्र अङ्गविकार:,। अक्ष्णान्यूनं काणी। अत: आत्मन: सिद्धिं करतलविर्तिनीं विगणय्य ।

जबाला -(स्वप्नाद् जागरिता इव) न। मम पुत्र: पिपठिषु: स:पठित्वा विद्वान् भविष्यति। भवत्या एतद् न श्रुतम् ।

"माता शत्रु पिता बैरी येन बालो न पाठित:"

पितामही - (लगुडं गृहीत्वा उत्तिष्ठति)

जबाला-स कथयति यत् विद्यां गृहीत्वा अहं त्वामपि पाठयिष्यामि घोष-पितामहीमपि।

पितामही- यथेच्छसि तथा कुरु । बलवती हि भवितव्यता।

(पठिष्यति पाठयिष्यति, पठिष्यति इति प्रजल्पन्ती शनैः शनैः निर्गता।)

इति प्रथमं दृश्यम्

अथ द्वितीयं दृश्यम्

स्थानम्- तदेव गृहम् । स एव चत्वर:।

काल: - मध्याह्नकाल:।

सत्यकाम: - (आत्मगतम्) घोषयाजिकेन कथायां भणितम्-

"किं कुलेन विशालेन विद्याहीनस्य देहिन:।
अकुलीनोऽपि विद्यावान्देवैरपि स पूज्यते ॥

एतद् अक्षरश: सत्यम् ।

विद्यया विना शुन: पुच्छमिव जीवितं व्यर्थमेव। (प्रकाशम्)मात:!

जबाला- (गेहात् बहिरागत्य चत्वरे, प्रेम्णा) वत्स आगतोऽसि । मम गोपालक:। मम जाबाल:।

सत्यकाम: - मात! अत्रागच्छ। उपविश। अद्य एतद् वद यत् कदा गुरुकुलम् गमिष्यामि।

जबाला- यदि एतद् तद् गच्छ। गच्छ। का अहम् अस्मि अस्मि त्वां रोद्धुम्?

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सत्यकामः– यदि एवं तद् न गमिष्यामि गायति–

त्वमेव माता च पिता त्वमेव

त्वमेव बन्धुश्च सखा त्वमेव।

मातः! त्वं का असि? त्वं ममं सर्वं असि। किन्तु विद्या न असि। सा तु गुरुकुले एव प्राप्ता भविष्यति। अतः गन्तव्यम् एव मया

जबाला– परश्वः गमिष्यसि।

सत्यकामः – (गणयति करे) अद्य। श्वः परश्वः। न न। श्वः। वद शुभस्य शीघ्रं । मातः! श्रूयते यद् गुरुकुल–प्रवेशार्थं परिचयोऽपि लीयते, दीयते च। आचार्यः मे गोत्रं प्रक्ष्यति माम् , तदा किं वक्तव्यम् ?

जबाला– (अधोमुखी मौनं धारयति)

मातः! वद। किं गोत्रम् ? कोऽस्ति मे पिता? सर्वदा अस्मिन् विषये त्वं मौनं धारयसि किन्तु...

सत्यकामः– (आवेगेन आवेदयन्ती)अद्य आवेदयामि ते किन्तु.....

जबालाः– अस्मिन् विषये अहमपि अनभिज्ञा!

सत्यकामः–अनभिज्ञा ?

जबाला– सत्यं शपामि ते। असाक्षिके अर्थे किं वदानि ?

सत्यकामः– (क्रुध्यति) तदा मम गुरुकुल–प्रवेशाय किं भविष्यति।

जबाला– वत्स! वनाद् आगत्य त्वं श्रान्तोऽसि, बुभुक्षितोऽपि । हस्तं प्रक्षाल्य भोजनादिकं कुरु । किञ्चिद् विश्रम्य ततः प्रस्थानाय सज्जीभव।

सत्यकामः – गोत्रज्ञानं विनैव प्रस्थानम् ?

जबाला– वत्स! निशि सर्वं निवेदयिष्यामि। आगच्छ। भोजनं कुरु। उभौ गृहाभ्यन्तरं गच्छतः।

इति द्वितीयं दृश्यम्

अथ तृतीयं दृश्यम्

स्थानम्– तदेव गृहम् । विस्तृतं चत्वरं! चत्वरे च छायातरुः निंबः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(चिन्तामग्ना जबाला चत्वरे)

कालः– सायंकालः ।

(तदैव तां समया समागच्छति तस्या अनन्यहृदया अन्तरतमा प्रतिवेशिनी सखी सुनन्दा)

सुनन्दा– हला! कथं चिन्तिता इव दृश्यसे?

जबाला– चिन्तिता? न!

सुनन्दा– किमर्थं गोपयसि?

जबाला– किम् ?

सुनन्दा– चिन्ताकारणम्?

जबाला– सखि! श्रोतुमिच्छसि चेत् , शृणु । मम अतीत-दिवसाः माम् अनुधावन्ति अद्यापि कीलितं इव मनः पीडयति माम्

सुनन्दा– स्पष्टं वद। किं जातम् ?

जबाला– त्वं तु जानासि एव यत् मया अस्य पापोदरस्यार्थे किं किं न कृतम्–

"किमकारि न कार्पण्यं कस्या लङ्घि न देहली।
अस्य पापोदरस्यार्थे किमनाटि न नाटकम् ॥"

सनन्दा– सर्वं जानामि किन्तु अयं भूतः कथं जीवितः?

जबाला– मम पुत्रः प्रतिदिनं पृच्छति मां यत् मम किं गोत्रम् ? कथय किं कथयानि?

सुनन्दा– अस्मिन् विषये किमर्थं चिन्तामग्ना। देहि किमपि नाम!

जबाला– असत्यम् । असत्याद् असुखोदयः।

सुनन्दा– सत्यकामः बालः न । यदि सत्यं श्रुत्वा क्रुध्यति तुभ्यम् तदा?

जबाला–तस्य क्रोधोऽपि अनुग्रह एव भविष्यति। मम कारणात् स समाजात् बहिष्कृतः। मम कारणाद् तस्य जीवनं दुःखपूर्णं जातम् । अतः न विभेमि मरणादपि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"सत्यमेव जयते नानृतम्"

सुनन्दे अद्य सत्यकामाय सत्यमेव निवेदयिष्यामि। (चत्वरात् निष्क्रान्ते उभे।)

इति तृतीयं दृश्यम्

चतुर्थं दृश्यम्

स्थानम्– तदेव गृहं। गृहाभ्यन्तरं तैलदीपः मन्दं-मन्दं प्रज्ज्वति। एकस्मिन् काष्ठ फलके सत्यकामः तिष्ठति। अन्यस्मिन् काष्ठफलके आसीना जबाला। चुल्यां कटाहे पाकोन्मुखं क्षीरभोजनं पश्यन्ती जबाला।

कालः– निशाकालः।

जबाला– सौम्य! अद्य तव प्रिय भोजनं क्षीरभोजनं पचामि। इदं तत्र गुरुकुले दुर्लभं भविष्यति (इति वदन्ती गद् गद् कण्ठा भवति)

सत्यकामः– यद् एवं तद् न गमिष्यामि।

जबाला– कथं न गमिष्यसि। गमिष्यसि। श्वोभूते ब्राह्ममुहूर्ते एव गमिष्यसि। शृणु-

"यस्य पुत्रो न वै विद्वान् न शूरो न च धार्मिकः।
अप्रकाशं कुलं तस्य नष्टचन्द्रेवशर्वरी।"

सत्यकामः– किन्तु मम गोत्रम्?

जबाला– (आवेगेन आवेदयन्ती) वत्स श्वणु! अनाथा अहं बाल्यकलाद् एव कुट्टहारिका। यदा अहं युवती सञ्जाता तदा मम सौन्दर्येण आकर्षितैः तैः तैः रूप ग्राहकैः विकारिता अहम्। गृहात् गृहं, द्वारात् द्वारं-द्वारं गच्छन्ती सम्पूर्ण-दिवसं यावत् कर्मरता अहं गर्भवती अपि जाता। न जाने सम्यक् तेषु मध्ये कोऽस्ति ते पिता? गोत्रं वा किम्?

Funding by IKS-MoE

सत्यकामः– (विचलितो भूत्वा) मात! रोदिति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जबाला– मा भैषीः। पुत्रक । यथा तथा विद्वान् भव ! ब्राह्मर्षिः भव। किमर्थं रोदिषि?

सत्यकामः– किन्तु माता गोत्र-विषये किं कथयिष्यामि?

जबाला– यदि गुरुः गोत्रं प्रक्ष्यति तदा कथय स्पष्टं यत् मम गोत्रस्य विषये मम् माता कथयति यत् अहं जीवनयापनार्थं श्रेष्ठीनां, ब्राह्मणानां, क्षत्रियाणां गृहात् गृहं गत्वा दासीकर्म कुर्वन्ती ते माता सञ्जाता । न जाने तेषु मध्ये कोऽस्ति पिता । मम नाम जबाला तव नाम च अस्ति सत्यकामः एवं त्वं सत्यकामजाबालः असि ।

सत्यकामः – मातः ! तव प्रतिज्ञानेन अहं कृतार्थः सञ्जातः ! अहं स्वाभिमानपूर्वकं कथयिष्यामि अधुना यत् "अहमस्मि सत्यकामजाबालः। इदमेव मम गोत्रं भविष्यति। गच्छामि(मातुः चरणयोः निपत्य)आज्ञापय माम्। (रोदिति)। आशीर्भिः बर्द्धापय।

जबाला– (साश्रुनेत्रा) शिवास्ते पन्थानः सन्तु।

सत्यकामः– मम कृते चिन्ता न करणीया । विद्यां प्राप्य शीघ्रमेव आगम्य पाठयिष्यामि त्वामपि तां घोषपितामहीमपि।

जबाला– अवश्यम्?

सत्यकामः– नेदं विस्मरिष्यामः। निष्क्रान्तः पुत्रः निष्क्रान्ता जबाला।

इति चतुर्थं दृश्यम्

पञ्चमं दृश्यम्

स्थानम्– हारिद्रुमतगौतमस्य सुन्दरं प्राकृतिक- सौन्दर्यसम्पन्नम् आश्रमम् । वटुकाः स्वध्याय- निरताः। ब्रह्मर्षिः गौतमः आसनस्थः।

कालः– प्रातकालः।

(गौरवर्णः स्वस्थः सत्यकामः समीपं गत्वा सहसा गुरुचरणयोः निपतति।)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आचार्यगौतमः – (बालकं दृष्ट्वा प्रीतोऽवदत्) सौम्य ! पठितुमत्र आगतो भवान् गुरुकुलम्? (सत्यकामः उत्थाय, नतमस्तकः) श्रीमन् ! आम् ।

आचार्यगौतमः– (हसित्वा) सुष्ठु। अहो त्वं तु "गङ्गायां घोषः" इत्यपि जानासि। मन्ये गङ्गाजलं पीत्वा तथा तत्र स्नात्वा निर्मलान्तकरणः भवान् सत्पाठकः भविष्यसि। सौम्य! तद् वद, तव किं गोत्रम्?

(प्राञ्जलिः प्राञ्जालः सत्यकामः किंचिद् ध्यात्वा)

सत्यकामः– श्रीमन् अहं एतद् तु न वेद्मि यत मम गोत्रं किमस्ति ? किन्तु अस्मिन् विषये मम मातुः प्रतिज्ञानम् श्रूयताम् ।

आचार्यगौतमः– (हसित्वा) वत्स! कथय। कथय। मा भैषीः।

सत्यकामः– मम माता, मम गोत्रविषये अकथयत् यत्- "अहं (अर्थात् मम माता) जनानां गृहेषु गत्वा गृहकार्यं करोमि स्म। अनाथा अहं बाल्यकालाद् एव कुट्टहारिका। यदा अहं युवती सञ्जाता तदा तत्र तत्र रूपग्राहकैः विकारिता अहम् । अहं सत्पथात् पतिता। त्वञ्च उत्पन्नः । न जाने तेषु मध्ये कोऽस्ति ते पिता? गोत्रं वा किम्? मम नाम अस्ति जबाला तव नाम च अस्ति सत्यकामः। एवं त्वं सत्यकामजाबालः असि। इदमेव ते गोत्रम् । अतः श्रीमन् अहं सत्यकाम जबालः अस्मि (सत्यकामस्य प्रतिज्ञानं श्रुत्वा समदर्शी प्रीतः गुरुः आसनाद् उत्थाय तं प्रथमं आलिङ्गति, पुनः पुनः चुम्बति, वदति च)

आचार्यगौतमः–वत्स! धन्योऽसि! धन्याऽस्ति ते माता जबाला सत्या। जाने

अहं यद् ब्राह्मणाद् ऋते न कोऽपि एवंविधः साहसिकः। एतावान् सत्यनिष्ठः ब्राह्मणः (ज्ञानी) एव भवितुं शक्नोति। सत्यान्वेषणं एव ज्ञानस्य विज्ञानस्य वा लक्षणं लक्ष्यम् च।

सत्यकामः– चरणयोः निपतति।

Funding by IKS-MoE

आचार्यगौतमः – उत्तिष्ठ । अहं तव पिता । इयं विद्या भविष्यति ते गुरुः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समिदाहरणाय वनं गच्छ। अहं अद्यैव ते उपनयनसंस्कारं करोमि। कृतोपनयनश्च त्वं द्विजः भविष्यसि।

इति पञ्चमं दृश्यम्"

भरतवाक्यम्

सर्वे च साक्षराः सन्तु। सर्वे सन्तु च शिक्षिताः।
प्रज्वाल्य ज्ञानदीप श्च। ज्ञानिनो भान्तु भारते ॥

✦ ए-३/२९ (प्रथमं तलम्)
सै-११, रोहिणी, नव दिल्ली-११००८५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मध्यमाम्बा

-राकेश कुमारः

(प्रविशति सूत्रधारः)

सुमित्रानन्दनौ यस्य भरतोऽप्यनुशासने।
मारुतिश्चभवंस्तस्मै जानकीजानये नमः।।

सूत्रधारः- अद्यास्ति रामस्य अभिषेकः स्वीकरिष्यति स युवराजपदं। आनन्दोत्सवोऽस्ति समस्त-साकेतनगरे। पुलकिताः जनाः विचित्रवसनाः अलंकृताः रूपवत्यः बालाः नृत्यन्ति इतस्ततः भ्रमन्ति च। दीपमालाभिः प्रकाशितः राजप्रासादः । सभायां उपविष्टस्य राज्ञः दशरथस्य गायन्ति यशोगानम् चारणाः। माता कैकेयी स्वहस्तेन निर्माणं करोति रामाय रत्न-स्वर्णजटिलराङ्कवम् । क एष आगच्छति तस्याः कक्षं प्रति ? अरे ! एषः कुलगुरुब्रह्मर्षिवशिष्ठः। अत्र ! इदानीं ! किमर्थम्?

(प्रविशति मन्थरा निवेदयति इमं सन्देशम् ।)

मन्थरा- देवि! द्वारस्थितो ब्रह्मर्षिवशिष्ठः।

कैकेयी- आह्वयतु सादरम् ।

मन्थरा- यथा आज्ञापयति देवी।

(प्रविशति वशिष्ठः)

कैकेयी- प्रणमामि कुलगुरुम् । कथमद्य इदं भवनं स्वचरणाभ्याम् पवित्रं कृतवान् , गुरुदेव!

(आकर्ण्य मृदुवचनं किञ्चित् स्मितवदनो ऋषिरुवाच)

वशिष्ठः - देवि ! अत्यावश्यकप्रयोजनेन आगतोऽस्मि भवत्यै दातुम् कष्टम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कैकेयी– (विस्मयेन) कष्टं! किमर्थं महर्षे? यस्यास्ति प्रत्येकं निःश्वासं परोपकाराय, तस्यादेशं परिपाल्य गौरवान्वितो भवेयम् अहम्।

(मौनं तिष्ठति वशिष्ठः, धीरगंभीरमुखे भवति क्षणिकद्वैधम् , वदति पुनः संयतस्वरेण।)

वशिष्ठः– अपेक्षे अद्य भवत्या एकः महान् त्यागः। ध्रुवं जानाति भवती यत् लङ्काधिपतिना रावणेन स्वासुरबलेन निर्मितम् दक्षिणप्रान्ते आर्यावर्त्ते आतङ्कसाम्राज्यम् । नश्यन्ति तपोवनानि, अपह्रियन्ते आर्यकन्यकाः, हन्यन्ते तपस्विनः, भक्ष्यन्ते नागराः प्रतिदिनं तस्य क्रूराकृतिभिः राक्षसैः। अनेन सन्ति अधुना तापसानां रुधिर–मेद–अस्थिपूरिताः यज्ञवेदयः। क्षिप्ताः सन्ति नरमुण्डाः यत्र–तत्र तपोवनेषु ।

कैकेयी– (द्रविता) महर्षे! भवतः आज्ञया अहमेव प्रयामि भूभृता सह असुराणां विनाशाय।

वशिष्ठः– नहि देवि! नास्ति आवश्यकम् इदम् । नहि जेष्यति राजा सैन्यबलेन लङ्केश्वरम् !

कैकेयी– तर्हि? (विस्मयेन वशिष्ठं पश्यति)

वशिष्ठः–एतदर्थं युवराजराम एव............।

कैकेयी– (सोत्साहं) सत्यं खलु महर्षे! रामः निश्चयेन तान् जेष्यति। सः समराङ्गणे गमिष्यति? अथ अहमेव अभिषेकानन्तरं रामं दक्षिणविजयनिमित्तं प्रेषयिष्यामि ।

वशिष्ठः– देवि! इक्ष्वाकुकुलवधूसदृश एव यशस्विन्यास्तवोत्साहः। एतेन प्रेरिता अद्य अहम् आगतोऽस्मि भवत्यै प्रदातुम् इदं कठिनं दायित्वं। भूभृतः प्रापय वरद्वयं चिरप्रतीक्षितं–भरतस्य राज्याभिषेकः रामस्य चतुर्दशवर्षेभ्यः वनवासम्।

(भूत्वा कान्तिहीना किंकर्तव्यविमूढा च पश्यति ऋषेः मुखं कैकेयी)

कैकेयी– (अश्रुपूरितनयना, विकलस्वरेण) महर्षे! किमर्थं करोति एवं वज्रपातं भवान् ? प्रियरामस्य अभिषेकदिवसे तस्य वनगमनम्? यः रामः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बाल्यकालतः सर्वाधिकं सादरं स्निह्यति, यस्मै ममापि सर्वाधिकः स्नेहः तं पुत्रं कथं वनाय प्रणोदयिष्यामि? नववध्वाः जनकतनयायाः सीतायाः प्राणाधारं कथं पृथक् करिष्यामि? (विलपति)

वशिष्ठः (आर्द्रनयनसन्) देवि! निस्सन्देहम् अद्य कार्यं कठिनम् अन्यायपूर्ण ञ्च प्रतीयते। अनेन एष रघुवंशः प्राप्स्यति अनेकानि कष्टानि। परन्तु, चिन्तयन्तु, एतस्य परिणामः। साम्राज्ञि! भवती जननी सदृशी प्रजानाम् । तेषां कृते करणीयः अयं त्यागः । कुशलं भविष्यति रामस्य; एतेन सम्पत्स्यते एकं महत्कार्यम् ।

कैकेयी- परन्तु किमर्थं रामस्य वनगमनम्? प्रेषयिष्यामि चतुरंगिणीसेना, गमिष्यन्ति भरतशत्रुघ्नलक्ष्मणाः तया साकम् ।

वशिष्ठः- नहि देवि! साकेतस्य सैन्यबलेन सुदूरदक्षिणस्थितम् असुरसाम्राज्यं विनाशयितुं न शक्यते। अथ किम् ? किञ्चित् अस्थिरमपि कर्तुं न शक्यते। भवती एतस्य कल्पनाऽपि कर्तुं न शक्नोति । वयं सर्वे ऋषयः महच्चिन्तनं कृत्वा इमं निष्कर्षं प्राप्तवन्तः। चतुर्दशवर्षपूर्वं इदं कार्यं पूर्णं न भविष्यति। तत्र रामस्य सैन्यबलानि भविष्यन्ति ऋक्षवानरादिवनवासिनः।

कैकेयी- (स्वगतम्) सम्यक् योजना चिन्तिता ऋषिभिः। परन्तु राज्ञः दशरथस्य, देव्याः कौशल्यायाः व्यथा, प्रजानाम् विरोधः भविष्यति चतुर्दिक् निन्दाऽपि। हा हन्त! (प्रकटम् , अनुनयेन) ऋषिवर ! परिवर्तयतु किञ्चित् स्वयोजनाम् । मा करोतु मां महापयशोभागिनीम्। अनुभवामि आत्मग्लानिम् ।

वशिष्ठः- किमर्थम् आत्मग्लानिः देवि ! धैर्येण विचारयतु । इदम् अपयशः स्वीकृत्य भवती करिष्यति प्रजाभ्यः अपूर्वत्यागम् । भगवता नीलकण्ठेनाऽपि संसाराय अमृतप्रदानाय कृतम् विषपानम् ।

(उत्तिष्ठति वशिष्ठः प्रणमति चरणयोः कैकेयी)

कैकेयी - (अर्द्धनिर्मितराद्धकवम् उरसिसंस्थाप्य अश्रुपूरितनयना

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विलपति) हा राम ! ते प्रियामध्यमाम्बा अद्य तुभ्यं पीतवल्कलं दास्यति। कैकेयी नाम

कठोरतायाः पर्यायो भविष्यति। इतः परं पतिशोकः, सपत्न्याः उपेक्षा, पुत्रवियोगः लोकनिन्दा च भविष्यति मे सञ्चिता निधिः। क्षमस्व मध्यमाम्बां राम! मा विस्मरतु मध्यमाम्बां राम! (विलपति)।

✦ द्वारा - मुंगरौड़ा जमालपुरम्-१५
जिला-मुंगेरः बिहारः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वयंवरम्

-डॉ॰ कृष्णनारायण पाण्डेयः

पात्र-परिचयः

रमेशः – समाजसुधारकः नवयुवकः

प्रकाशः – कन्या-पिता

मोहनः – विवाहयोग्यः युवकः

रमाकान्तः– मोहनस्य पिता

प्रभा – मोहनस्य पिता

माया – विवाहयोग्या कन्या

माधुरी – मायायाः सखी (कृषक-कन्या)

प्रकाशः – श्रीमन्! रमाकान्तमहोदय! सुप्रभातम्!

रमाकान्तः – सुप्रभातम् मित्र! प्रकाश! कथय कुशलं सर्वम् ?

प्रकाशः– भवत्कृपया सर्वं कुशलम् ।

रमाकान्तः – आगम्यताम् , आस्यताम् ।

प्रकाशः – अनुगृहीतोऽस्मि। अयं रमेशः, आदर्शयुवकः, समाजोत्थाने रतः।

रमेशः – प्रणमामि श्रीमन् !

रमाकान्तः – सुखी भव। आयुष्मान् भव।

रमेशः – भवतां सुतः, मोहनो मम मित्रम् । वयं मोहनस्य विवाह सम्बन्धाय अगताः।

रमाकान्तः – शोभनम्! भवतः ग्रामस्य नाम किम् ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रमेशः – मम ग्रामस्य नाम पाण्डुपुरी उन्नाव जनपदे।

रमाकान्तः – भवतः पिता किं करोति ?

रमेशः – मम पिता कृषकः अस्ति।

रमाकान्तः – वरम्।

(चौगोला छन्दः)

ग्रामे मम ते स्वागतं, पश्यतु वैभवमत्र,
गृह-वाहन-सम्पत्ति युतं, सुखसमृद्धिरेकत्र।
सुखिनी स्थास्यति कन्यका, स्वयमेव जानन्तु,
पुत्रः सर्वगुणी मम, करंणीयं कथयन्तु॥

प्रकाशः– (बहरतवील)

मतकृते रुचिकरं ते, श्रेष्ठं कुलम् ,
कन्यका गुणवती राज्य-सेवारता।
जीविकाध्यापनं, नापरं साधनम् ,
सेवितुं पत्रपुष्पादिकं, केवलम् ॥

रमाकान्तः– मित्र प्रकाश, अहं तु किमपि न इच्छामि परन्तु–

स्नातको बैंकसेवारतो मे सुतः,
यौतुकं तस्य लक्षं जनैर्दीयते।
मोहनो मोहकः चेत् सुतायाः कृते,
एतदर्थं मयाऽऽकारणं ते कृतम् ॥
वस्तुतो यौतुकं नास्ति मे सम्मतम्।
पुत्रमाता तदर्थं भृशं कांक्षिणी॥

रमेशः– श्रीमन् ! कृपया श्रूयताम्–

परिचितः मोहनः कन्या-माया कृते,
तस्य इच्छानुसारं सुक्रियते मया।
कार्यरतता समा तथा शिक्षा समा,
समविवाहे कथय, भेदभावः कथम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रमाकान्तः - हे प्रभे, मोहनस्य मातः, आगच्छतु विज्ञापयतु, मोहन-विवाहार्थं किं कथ्यते।

प्रभा-(आगच्छन्ती)

यत् मूल्यं घोषितं पूर्वैः कथं न्यूनं भविष्यति।
विवाहयोग्या मे कन्या, को निर्मूल्यं वरिष्यति।।
बैंकरत-मोहनाय, लक्षैकं यौतुकं मतम् ।
धनिकैः सह सम्बन्धः, समाजे वैभवात्मकम् ।।

प्रकाशः- क्षमस्व तावत् माम्, नाहं तथा सामर्थ्यवान् ध्रुवम् ।
सुतमूल्याधिकं यत्र विक्रेयस्तत्र स त्वया ।।

रमेशः-मातः!

पुनः विचारः कर्तव्यः सम्बन्ध उत्तमोऽस्त्ययम्।
यौतुकाधिकं मूल्यं कन्याया इति चिन्त्यताम्।
आदर्शोऽयं समाजस्य यौतुकं कुप्रथा सदा,
सर्वः समाजो मन्येत, धनमर्ज्यं स्वपौरूषैः।।
श्रीमन् मैत्रीभावस्य परिपालनम् अपि करणीयम् ।
धनं तु गच्छति आगच्छति समाजचिन्तनम् अपि करणीयम् ।।

रमाकान्तः- कोऽपि राजा भवेत् तत्र हानिर्न मे
नास्ति चिन्ता मदीया कथञ्चित् सखे!
स्वार्थसिद्धेर्विचारः सदा जीवने
त्वं तु भूयास्तथा, मम तु एवं मतम् ।।

प्रकाशः-त्वम् यथा वर्तसे, तत्र तुष्टिर्न मे,
त्वं तु शेशे चिरं शोभनं तत् कथम् ।
एकता पाठपाठो, यदा दीयते,
भेदभावः कथं, मानवे मानवे।।

प्रभा- अरे, कन्या-विवाहार्थम् आगत उतोपदेशाय,
स्वयं कृतं किं त्वया, अद्यापि समाजाय।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रमेशः- यौतुकविरोधे अभियानं चाल्यते,
यौतुकं दोषरूपं समाजे सदा।
त्याज्यमेतद् प्रयासेन सर्वैर्मुदा।।
अहमपि विना यौतुकं विवाहं करिष्यामि।

प्रभा- शोभनं शोभनं कार्यमेवं सदा,
कथयन्ति सर्वे कुर्वन्ति के ?
श्रेष्ठिकन्या भवेत् चेत् वधूर्मे गृहे,
मोहनो मे भवेत् तर्हि लक्ष्मीपतिः।।

रमाकान्तः- एकः प्रस्तावः महाभूमिपतेः वर्तते, तस्य केवला कन्या। महासम्पत्तेः उत्तराधिकारी भविष्यति मम सुतः। यौतुकाय याचना न क्रियते, जनैः दीयते यदि तर्हि किमर्थं न स्वीकरणीयम् ।

प्रभा- एतदर्थं प्रदत्ता मया स्वीकृतिः,
श्रेष्ठ-सम्पत्तिवान् कोऽपि भूयात्ततः ।
कोऽपि पूर्वो भवेद् वा भवेत् पश्चिमः,
तत्र सम्बन्धयोग्याः भवन्तः कथम् ?
गच्छन्तु भवन्तः नमो नमः।

रमेशः-श्रूयतां कृपया, अस्मिन् सम्बन्धे मोहनस्य स्वीकृतिः वर्तते।

प्रभा-तेन किम्? यावद् आवयोः स्वीकृतिर्न भविष्यति, मोहनः किं करिष्यति? मोहनः मातृ-पितृ-भक्तः पुत्रः।

रमाकान्तः-मोहनः स्वकक्षे वर्तते, यदि न विश्वासः। रमेशः तत्र गत्वा पृच्छतु स्वमित्रम् ।

(गति-संगीतम्)

बन्धुवर मोहन! अद्य या वार्ता जाता। श्रुतैव भवता। सम्प्रति किं करणीयम्?

मोहनः- मित्रवर रमेश! मातापित्रोः आज्ञाया उल्लंघनं कर्तुं न क्षमोऽहम्। कृपया क्षम्यताम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रमेशः- अरे धूम्रपानसमये सुरापाने मातापित्रोः आज्ञा प्राप्यते वा। प्रेम-विवाहसदृशपुण्यकार्ये एव आज्ञा परिपालनीया वा?

मोहनः- अहम् असमर्थः।

रमेशः- न शोभनम् इदम् । विद्यालयजीवनस्य स्मरणं करणीयम् ।

पाठशालासु दृष्टा यदा सा त्वया,
दिव्यरूपेण विक्षिप्तवत् ते मनः ।
चञ्चलत्वात् त्वयाऽऽसीत् प्रतिज्ञा कृता,
सर्वभावानुरक्तोऽस्मि, भूयात् प्रिया ।।
तेन तस्याः पिता त्वद्गृहं चागतः।
किन्तु युष्मत्पिता विक्रयायोद्यतः।।

मोहनः- एकलक्षं धनं तद् भवद्भिः श्रुतम् ,
तत्र लक्षद्वयं चापि त्यक्तं मया।
चेत् ततश्चाधिकं त्याज्ययेवास्ति तत् ।
मातुराज्ञा कदाचिन्न त्याज्या मया।।

रमेशः- सखे मोहन! भवान् सुशिक्षितो युवकः। समाजे नवक्रान्तिः करणीया। परम्परां विहाय विवेकेन विचारयतु। किमपि नवीनं करणीयम्। ध्यानं देयम्-

वस्त्र-संक्षालनं लालनं पालनं,
सर्वसेवारता या त्वदीया सदा।
तुल्यताया युगे सा समाना सदा,
दान-भिक्षा कथम् अत्र दुष्टायते।।
यौतुकार्थेन भूत्वाऽवरः त्वं वरः।
किमर्थं तदा नैव लज्जायते।।

मित्रवर! सामाजिक-कलंक (दहेज)-वर्जनाय किमपि करणीयम् ।

मोहनः- (उद्विग्नतायाम्)।

भवतां समाजसुधारे क्रियते यदि स्वाहा मया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

को मिलिष्यति मम कृते, भगिनी-विवाहार्थं तथा।।

रमेशः- बन्धुवर!

विश्वासः करणीयः सदाचारे किं दुर्लभम् ।
करिष्याम्यहं प्रथमं भवतां कार्यं निश्चितम् ।।

मोहनः- केन प्रकारेण सम्भवमेतद् , किञ्च करणीयं मया?

रमेशः- भवान् जानाति एव अस्माभिः यौतुकवर्जनाभियानं चाल्यते। कृपया सपरिवारम् अस्माकम् अभियान-सभायां समागच्छन्तु सर्वेषां सहयोगेन सर्वं सिद्धं भविष्यति।

मोहनः- शोभनम् । वयम् आगमिष्यामः सपरिवारम् ।
यदि मम भगिनी विवाहः विना यौतुकं भविष्यति अहमपि आदर्श-प्रस्तुतिं करिष्यामि।

(परिवर्तन-संगीतम्)

(दृश्य-परिवर्त्तनम्)

(समारोह-वातावरणम्)

रमेशः-(समारोह-मञ्चतः) समाजोत्थानाय तत्पराः समागता सज्जनाः! भवतां सवेषां स्वागतं करोति अस्माकं यौतुकवर्जनसमितिः।

असम्भवं नास्ति किञ्चित् प्रयासः क्रियते यदा ।
सहजं सम्भवं लोके, यौतुकप्रथा-वर्जनम् ।।

(तालीवादनं)

सर्वप्रथमं समाजहिताय सर्वे प्रतिज्ञां कुर्वन्तु-

अहं केवलं यौतुकरहितं विवाहसम्बन्धं स्वीकरिष्यामि।
यौतुकलोभिजनानां सामाजिकबहिष्कारं करिष्यामि।
स्वपुत्रस्य तस्मिन्नेव परिवारे विवाहसम्बन्धं करिष्यामि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यस्मिन् परिवारे विवाहे कदापि यौतुकग्रहणं न करिष्यते।। अधुना अद्यतनकार्यक्रमस्य परिचयं कारयिष्यन्ति अस्माकं गुरुवर्या: श्रीप्रकाशमहाशयाः।

प्रकाशः- विवाहसम्बन्धं केवलं तस्मिन् परिवारे करिष्यामि यस्मिन् यौतुकरहितविवाहकरणाय प्रतिज्ञा क्रियते कार्यते च भविष्ये। अस्या प्रतिज्ञायाः परिपालनेन आदर्शविवाहश्रृंखलानिर्माणं भविष्यति । एवमेव द्वितीयउपाय अस्ति-परिवारत्रये क्रमशः विनिमयेन विवाहसम्बन्ध-निर्धारणं, प्रथमपरिवारस्य युवकस्य विवाहः द्वितीयपरिवारस्य कन्यकया सह, द्वितीयपरिवारस्य युवकस्य तृतीयपरिवारस्य कन्यकया सह, तृतीय-परिवारस्य युवकस्य विवाहः प्रथमपरिवारस्य कन्यकया सह भवितुं शक्नोति नवप्रयोगरूपेण। एतदर्थं विचारणीयम्-

रमेशः- गुरुदेवस्य निर्देशानुसारं युवकसमाजेन किमपि नवीनं करणीयम्। कुप्रथाः मानवसमाजे राक्षसरूपाः। राक्षसबधाय सर्वे तत्पराः भवन्तु।

अन्धश्रद्धा कुरीतिः कुप्रथाभ्रमः,
द्वेषपाखण्डधर्मान्धकट्टरजनाः।
निर्दोषहत्यारताः ये तथा,
राक्षसानां वधः सर्वदा संभवेत् ।।

अतः संकल्पः करणीयः-

विवाहं करिष्याम्यहं तद् गृहे,
यस्य पुत्रस्तु यौतुकविरुद्धे भवेत् ।
प्रतिज्ञा तथा स्यात् समाजे पुनः,
क्रमशः तथा श्रृंखलां चालयेत् ।।

समवेतस्वरे- अभिनन्दनीयम् अभियानम् । शोभनम् । अस्माभिः करिष्यते।

Funding by IKS-MoE

प्रकाशः- धन्यवादाः, प्रगतिशीलाः वयम् इति सत्यं कथम् ,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भेदभावः सदा जीवने दृश्यते।
आधुनिकाः वयम् इति मिथ्या सदा,
यच्च पूर्वं कृतं तच्च विस्मर्यते।।
सावित्र्या वृतः 'सत्यवान्' स्वयं कृतं वर-चयनम्,
शकुन्तला-दुष्यन्त-विवाहे कुत्रासीत् यौतुकम्।
यूनां कृते परीक्षा वरणार्थं सुस्वयंवरम्,
प्राचीने यत् प्रचलितं, तत् सर्वत्र प्रवर्तताम्।।

रमेशः– धन्यवादः। अधुना आधुनिकस्वयम्वराय नियमावली प्रस्तूयते–

अत्र सूची द्वयं दीयते यन्मया,
तत्र नामानि यूनां प्रदत्तानि वै।
चेत् द्वयोः स्वीकृतिः स्यात् समाना तदा,
तौ स्वयं स्वीकृतौ सम्मतौ दम्पती।।

(तालीवादनम् शोभनं शोभनम् ध्वनिः)

साम्प्रतं स्वमतदानाय 'स्वयंवर-पत्रक'-वितरणं क्रियते, वरीयताक्रमानुसारेण अंकनं कृत्वा प्रदीयताम्। सर्वेषां क्रमशः परिचयः कार्यते मया, यस्य नाम-कथनं क्रियते सः सा वा कृपया समागच्छतु मञ्चे।

सर्वप्रथमम्–

इयं माधुरी, कृषकस्य पुत्रिका–एम॰ ए॰, बी॰ एड॰ कवयित्री च।

(मंचतः ध्वनिः– कृपया एकं गीतं श्रावयतु भवती।)

रमेशः– शोभनम्। माधुरी महोदया कृपया एकां रचनां श्रावयतु।

माधुरी– मनुजेषु हंसकाकजाति भेदभावो नास्ति।

सिंहानां शृगालानां नास्ति भिन्नता मुखे।।

गुणैरेव ज्ञायते को नरः कः पशुः मूलतः न भेदभावो दृश्यते तथा नरे।।

Funding by IKS-MoE

रंग रूपजातिवस्त्रगणना न शक्या अत्र, यथा एकः तथा अन्य ऐक्य–

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावभरिते स्नातो भेदभावो स्यात् स्नेहनदमध्ये सदा शान्तशीतधारया शान्तिः स्यात् भूतले ॥

रमेशः– इयं माया– एकस्मिन् विद्यालये प्राध्यापिका ।
अयम् अत्र कमलः– एम॰ ए॰, पीएच॰ डी॰। इंजीनियर अभियन्ता, लोकगीते अपि कुशलः। कृपया एकं होलीगीतं प्रस्तुतं करोतु ।

कमलः– यथा निर्देशः प्रस्तूयते

होलीं खेलति रघुवीरः मधुमयीं,
होलीं खेलति रघुवीरः।
हो कस्य करे शोभते मृदंगः,
कस्य करे हि मंजीर अहा हा ॥
कस्य करे हि मंजीरः॥ होलीं''' ॥ १ ॥
रामकरे शोभते मृदंगः।
लक्ष्मणस्य मंजीरः अहा हा ॥
लक्ष्मणस्य मंजीरः॥ होलीं''' ॥ २ ॥
कस्य करे स्वर्णिमजलयन्त्रम् ।
कस्य करे हि अंबीरः अहा हा ॥
कस्य रहे हि अंबीरः॥ होलीं''' ॥ ३ ॥
भरतकरे स्वर्णिमजलयन्त्रम् ।
शत्रुघ्नस्य अंबीरः अहा हा ॥
शत्रुघ्नस्य अंबीरः॥ होलीं''' ॥ ४ ॥
होलीं खेलति रघुवीरः मधुमयीं ।
होलीं खेलति रघुवीरः॥ ५ ॥

अयं वर्तते मोहनः बैंकसेवारतः।
Funding by IKS-MoE
इयम् ऋचा – भरतनाट्ये प्रवीणा ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(गतिशील-संगीतम्)

एक: श्रोता-साम्प्रतं संयोजकस्य अपि परिचय: भवेत् ।

रमेशः- अवश्यमेव। परिचयो दीयते मया-

नाहं हिन्दू जैन पारसी,
बौद्ध यहूदी संत इसाई ।
नाहं मुस्लिम सिक्ख कबीरी,
आर्यसमाजी भक्त बहाई ।।
नाहं पण्डित फादर मुल्ला ।
अहम् मनुष्य: पृथ्वीपुत्र:।।
नाहं योगी संन्यासी वा,
नाहं हरे राम हरे कृष्ण:।
नाहं युग निर्माण योजना,
नाहं भावातीतं ध्यानम् ।।
अहं सनातन मानव धर्म:।
अहं मनुष्य: पृथ्वीपुत्र:।।

(जनध्वनि: -शोभनम् शोभनम्।)

(गति-संगीतम्)

रमेशः- साम्प्रतं वर-कन्ययो: स्वयंवृत्त-नामसूची-मेलनं क्रियते ।

(मन्द-संगीतकम्)

रमेशः- परमानन्ददायकं फलम् । एकस्मिन्नेव दिने दश विवाहसम्बन्धा: निर्धारिता:।

(तालीवादनम्)

श्रूयन्ताम्- मोहनस्य मायया सह परिणयो निश्चित:।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(तालीवादनम्)

प्रभा– अरे, अरे, किम् इदम्? मम एकलक्षमूल्यस्य सुतस्य विवाहः विना यौतुकं निर्मूल्यं भविष्यति? मया न स्वीक्रियते।

रमेशः– शृणोतु भवती, अत्र न चिन्ता कार्या। भवत्याः कन्यकायाः विवाह–सम्बन्धः अपि कमलेन सह निर्धारितः। सर्वं यौतुकरहितम्, किमपि कस्मै अपि न देयम्।

प्रभा– किं सत्यमिदम्?

रमेशः– अथ किम्?

प्रभा– तावत् स्वीक्रियते मया।

रमाकान्तः– मयाऽपि स्वीकृतिः प्रदीयते।

रमेशः– अद्य सायंकाले अत्रैव सामूहिकविवाहसमारोहः समायोजयिष्यते सर्वे सादरम् आमन्त्रिताः प्रीतिभोजे।

सर्वे– (समवेतस्वरेण)

निर्यौतुकं वैवाहिकं शुभंबन्धनं नवमंगलम्।
कल्याणदं शुभमंगलम् अभिनन्दम् अभिनन्दम्॥

✦

उपनिदेशकः राष्ट्रभाषा
आकाशवाणी महानिदेशालयः
नव देहली ११०००१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिराजवधम्

-डॉ॰ सुदर्शन शर्मा

पात्राणि

पुरुषाः-

१. काशी राजो महासेनः
विष्णुसेन पुत्रः

२. जयवर्मा-विष्णुसेन कनीयान् भ्राता

३. सूत्रधारः

४. प्रतीहारः

५. काञ्चुकीयः

स्त्रियः

१. कुरंगी - विष्णुसेनभार्या

२. सुमित्रा - जयवर्मा-भार्या

३. सुप्रभा - महासेनराज्ञी

४. प्रतिहारी

५. सैरन्ध्री

अथ प्रथमोऽकः।

बाणः कवीनामिह चक्रवर्ती
चकास्ति यस्योज्ज्वलवर्णशोभा ।
एकातपत्रं भुविपुष्पभूत
वंशाश्रयं हर्षचरित्रमेव ।। १ ।।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्रधारः-

ब्रह्मदत्तो महानासीत्
काशिराज्ये महान्नृपः।
तस्य वंश्यो बभूवासौ
विष्णुसेनो नृपस्तदा ।। २ ।।
द्यूतक्रीडा क्रिया तस्य
मृगया व्यसनं तथा ।
स्त्रीमद्यद्यूतसंसर्गः
प्राणिनां हितनाशकः ।। ३ ।।
(प्रविश्य पटीक्षेपेण)

नटी-आर्य ! किमेवं दार्शनिक इवात्मन्येव विवक्ति भवान् ।

सूत्रधारः- आर्ये ।

काशिराज्यं महद्राज्यं
राज्ञां वंशैकभूषणम् ।
परं दैवात् च दुर्भाग्यं
व्यक्तिविद्वेषधायकम् ।। ४ ।।

नटी- आर्य ! कोऽयं व्यक्तिविद्वेषभावः । किं नाम घटित घटनमुद्दिश्य दर्शनमुद्भावायति भवान् ।

सूत्रधारः- काशीराजो महान्नेता
महासेनोऽति वीर्यवान् ।
मघद्यूतक्रियासक्तो
नैव शस्यो विवेकिभिः।। ५ ।।

नाटी- केयं विपद्गतिराप्ता येनेव प्रवक्ति भवान् ।
राज्ञां क्रियाकौतुकमानकीया
वृत्तिर्जगत्यामभिशस्यमाना ।
Funding by IKS-MoE
लौकैर्हिता पौरुषवर्धनाढ्या

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शौर्यबलं साहसवृद्धिसत्कम् ।। ६ ।।

सूत्रधारः-

राज्ञां क्रिया राज्यविधानकीया
वाग्दण्डपारुष्य विशेषमूढा
बाह्यान्ततः कोपविशेषरक्ता
राज्यस्थितौ द्वेषगतिं दधाति ।। ७ ।।

(नेपथ्ये कलकलः)

सुप्रभा नाम या राज्ञी
राज्ञा कोपेन दूषिता ।
वैभवे चात्मकीये सा
रोषरुग्णा बभूव हि ।। ८ ।।

(निष्क्रांतः सूत्रधारः नट्या सह)

।। इति प्रस्तावना ।।

(प्रविशति सुप्रभा)

सुप्रभा- राजा महान्राजाकृतां विनोदी
कार्ये स्वकीये भृतिमादधानः।
रोषैकदोषेण निषद्य मूढः
अन्तःपुरं नैव करोति तुष्टम् ।। ९ ।।

(प्रविश्य)

प्रतिहारी – आर्ये !

महतीसेना बभोर्यस्य
महासेनो महान्नृपः।
कौशलेन्द्रेण संरक्तः
राज्यकार्येक दर्शकः ।। १० ।।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुप्रभा – आर्ये !

अयमेव तु कालश्च
यौवनैकप्रसाधकः।
मन्त्रिसाध्यं यथाराज्यं
राजा रञ्जं न राजकः।। १० ।।

प्रतिहारी – आर्ये !

ब्रह्मदत्तेन यद्राज्यं दत्तं पौरुषसंस्कृतम् ।
योगक्षेमैकभावित्वात् मण्डलैकाहि ताहितम् ।। १२ ।।

सुप्रभा – काञ्चुकीयम् आहूयताम्

(निष्क्रान्ता प्रतिहारी)

(निष्क्रम्य पुनः प्रविश्य काञ्चुकीयेन सह)
सुप्रभातमार्यायै ।

सुप्रभा – बादरायण ! कः कालस्त्वामन्विष्यामि।

क्व आस्ते महाराजः।
यौवराज्याभिषेकार्हः
कुमारः क्व गतस्ततः।
कस्य कार्ये च संलग्नौ
पितृपुत्रौ च जग्मतुः।। १३ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काञ्चुकीय:

पुरोधसा प्रधानेन
सुमन्त्रेण समाहित:।
रक्तचेताश्च राजाऽसौ
राज्यकार्यैकचिन्तक:।। १४ ।।

कुमारोऽपि तथाभूत:
धनुर्ज्यालग्न-धारण:।
मृगयां संविधायाशु
वनस्थलीं गत: स्वत:।। १५ ।।

सुप्रभा-बादरायण !

निवेद्यताम् महाराजाय महासेनाय ।
राज्यकार्येषु संरम्य
दासीदर्शनविस्मृतौ ।
केन कार्येण संमूढो
भवान् नायाति रोषकृत् ।। १६ ।।

काञ्चुकीय:-

सन्दिशामि भवत्यायत्
कार्यकारणसंगतम् ।
(निष्क्रम्य पुन: प्रविश्य)
महाराजो महासेन:।
भवत्संतोषधायक:।। १७ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कार्यभारं च संत्यज्य ।
सम्मोहैकविलासकृत्
आगतः तुष्यतां राज्ञी
रोषरागं च मुञ्चतु ।। १८ ।।

(निष्क्रान्तः)

सुप्रभा- (उत्थाय अभिवाद्य च)
विजयतां महाराजः।

महासेनः- कार्यव्यापृततया अप्राप्तावसरोऽस्मि । प्रमादो नैवाशङ्क्यः।

सुप्रभा- आर्यपुत्र ! नैव पश्यामि इति व्याकुलितचेतसा संतोषं नैव लब्धवती । भवांस्तु कार्यमेव राज्यभारं विविच्य भोक्तुमपिकालं न लभते । उपविशतु भवान् भोक्तुमग्नये व्यञ्जनजातम् । कार्यव्या-पृतिर्भवतः स्वास्थ्यह्रासकारिका। अयं मधुरको रसायभूतः आस्वाद्यताम् पानार्थम् च मद्यमपि संस्कृतम्
(महासेनः पिबन्नेव मोहं गतः)

सुप्रभा- आहूयताम् वैध-व्यंजनाः
औषधं चानीयतां मोहश्चेत् प्रति निवर्त्यताम्)
(प्रविश्य)

प्रतिहारी-(सकाञ्चुकीया सवैद्या च)
(राज्ञो नाडीमनुभूय)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृतोऽत्रभवान्

राज्ये हाहाकार शब्द:।

सुप्रभा- अराजकं न राज्यं स्यात्

कुमारो भवतु राज्यकृत्

प्रजाः प्रजाः इव मत्वा

सर्वकिंचिच्छुभं भवेत् ॥ १९ ॥

इति भरतवाक्यम् ।

✦ एच० आई० जी० ब्लाक-६१

बी-३ से० ६ परमाणु-१७३२२०

Bhawan's Sri Sankaracharya Sanskrit Bharatiya Vidya Mahavidyalay
२५१
Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Bhawan's ... arya Sanskrit Mahavid... Vidya

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्र दिल्ली सर्वकारः)
प्लाट सं॰ ५, झण्डेवालानम्, करोल बागम्
नवदेहली-११०००५

Funding by IKS-MoE